M.A. Sanskrit
Year – I
Semester – I
Paper - I

# Vedas & Upanishads
# वेदाः उपनिषदश्च

## Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**
Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC
**Enathur, Kanchipuram 631561.**
Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr.G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr.B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

Assistants
S. Vasudevan
S.V. Kalpavalli

© SCSVMV Deemed University, June 2024
All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre
Further information on the SCSVMV ODL Programmes may be obtained from
**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
Enathur, Kanchipuram-631561.
TamilNadu, India
Phone: 044 – 27264301; Mail Id: onlineprograms@kanchiuniv.ac.in

# शुभाभिनन्दनानि

संस्कृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor
Sri ChandrasekharendraSaraswati Viswa Mahavidyalaya
Enathur, Kanchipuram

# वेदाः उपनिषदश्च

**पाठ्यपरिचयः**

पत्रमिदं अनादिनिधनस्य वेदसमुदायस्य परिचयं विदधाति। चतुर्धा विभक्तस्य वेदराशेः मन्त्र-आरण्य-ब्राह्मण-उपनिषदां तथा प्रातिशाख्यगृह्यसूत्राणां शाखानाञ्च परिचयं विदधात्ययं पाठ्यभागः। पञ्चसूक्तानां मुख्यानां वर्ण्यविषयं तथा च कठोपनिषदः परिचयं च प्रकुरुते। अनेन च छात्राः वेदवाङ्मयस्य परिचयं सम्पूर्णं विहगदृष्ट्या प्रापयति।

**प्रथमः खण्डः – ऋग्वेदयजुर्वेदयोः मन्त्र-आरण्यक-ब्राह्मण्य-प्रातिशाख्य-गृह्यसूत्राणाम् परिचयः**

अस्मिन् खण्डे ऋग्वेदस्य मण्डल-सूक्त-मन्त्रविभागाः, अष्टकरूपेण विभागः, तस्य शाखाः, आरण्यक-ब्राह्मणानां परिचयः प्रातिशाख्य-गृह्यसूत्रपरिचयः, यजुर्वेदस्य प्रपाठकाणि, शाखाः, प्रातिशाख्यगृह्यसत्राणि, आरण्यकब्राह्मणपरिचयः इत्येते विषयाः विमृष्टाः।

**द्वितीयः खण्डः - सामवेदाथर्वदयोः मन्त्र-आरण्यक-ब्राह्मण्य-प्रातिशाख्य-गृह्यसूत्राणाम् परिचयः**

अस्मिन् खण्डे सामवेदस्य विभागः, तस्य शाखाः, आरण्यक-ब्राह्मणानां परिचयः प्रातिशाख्य-गृह्यसूत्रपरिचयः, अथर्ववेदस्य, शाखाः, प्रातिशाख्यगृह्यसत्राणि, आरण्यकब्राह्मणपरिचयः इत्येते विषयाः निरूपिताः।

**तृतीयः खण्डः – उपनिषदः**

अस्मिन् खण्डे ईश-कठ-केन-प्रश्न-मुण्डक-माण्डूक्य-ऐतरेय-तित्तिरीय-बृहदारण्य-छान्दोग्योपनिषदाम् परिचयः, तासां प्रतिपाद्यविषयः, भाष्याणि, दर्शनक्षेत्रे प्रामुख्यम् इत्येते विषयाः समुपवर्णिताः।

## चतुर्थः खण्डः – मुख्यसूक्तानि

अस्मिन् खण्डे इन्द्र-वरुण-अग्नि-सोम-अश्विनीसूक्तानां विवरणम्, मन्त्राणाम् भावार्थः, प्रतिपाद्यविषयाः, भाष्यदृष्ट्या प्रामुख्यम् इत्येते विषयाः वर्णिताः।

## पञ्चमः खण्डः – कठोपनिषत् (मूलमात्रम्)

अस्मिन् खण्डे कठोपनिषदः प्रामुख्यम्, वल्लीनाम् परिचयः, मन्त्राणाम् भावः, नचिकेतसः वरत्रयम्, आध्यात्मिकक्षेत्रे उपनिषदोऽस्याः प्राधान्यम् इत्येते विषयाः वर्णिताः।

वेदवाङ्मयस्य परिचयेन तन्निरूपितविषयाणां तद्विभागस्य च परिचयेन संस्कृतवाङ्मयपरिशीलने प्रवृत्तः कश्चन स्नातकोत्तरकक्ष्यायाः छात्रः प्रवर्तते। अनेन च समस्तसंस्कृतवाङ्मयस्य विहङ्गमदृष्टिसंवलितः शोधेषु प्रावीण्यं लभते। अतः पाठ्यभागोऽयं सर्वाङ्गीणतया उपस्करोति।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| **प्रथमः** | **ऋग्वेदः, यजुर्वेदः** | **8-33** |
| | ऋग्वेदस्य विभागः | 9-26 |
| | यजुर्वेदस्य विभागः | 26-39 |
| **द्वितीयः** | **सामवेदः, अथर्ववेदः** | **40-4**8 |
| | सामवेदस्य विभागः | 41-44 |
| | अथर्ववेदस्य विभागः | 45-48 |
| **तृतीयः** | **उपनिषदः** | **49-62** |
| | ईश-केन-कठ-उपनिषदः | 55-62 |
| | प्रश्न-मुण्ड-माण्डूक्य-उपनिषदः | 62-67 |
| | एतरेय-तैत्तिरीय-उपनिषदौ | 67-70 |
| | छान्दोग्य-बृहदारण्यकोपनिषदौ | 71-74 |
| **चतुर्थः** | **सूक्तानि** | **75-117** |
| | इन्द्रसूक्तम् | 78-88 |
| | अश्विनीसूक्तम् | 89-97 |
| | सोमसूक्तम् | 98-102 |
| | अग्निसूक्तम् | 103-108 |
| | वरुणसूक्तम् | 109-117 |
| **पञ्चमः** | **कठोपनिषत्** | **118**-145 |

| | | |
|---|---|---|
| | प्रथमाध्याये प्रथमवल्ली | 121-125 |
| | प्रथमाध्याये द्वितीयवल्ली | 126-130 |
| | प्रथमाध्याये तृतीयवल्ली | 131-133 |
| | द्वितीयाध्याये प्रथमवल्ली | 134-136 |
| | द्वितीयाध्याये द्वितीयवल्ली | 137-139 |
| | द्वितीयाध्याये तृतीयवल्ली | 140-145 |

॥श्रीः॥

# ऋग्वेदः, यजुर्वेदः – खण्डः-1

## (मन्त्राः-आरण्यकम्- प्रातिशाख्यम्- गृह्यसूत्रम्-मण्डलम्- सूक्तम्-शाखाः)

## प्रस्तावना

मन्त्रब्राह्मणयोर्वेदनामधेयम् इति श्रुत्या मन्त्रब्राह्मणौ वेदस्यैव द्वौ भागौवर्तेते। एवं ब्राह्मणस्य अपि भागत्रयमस्ति इति । ते च ब्राह्मणम् आरण्यकम् उपनिषच्चेति। ब्राह्मणग्रन्थानां विषये विस्तृतपरिचयः आदावेव अभवत्। सम्प्रति आरण्यकानां विषये परिचयः उपस्थाप्यते। ऋग्वेदादिभागानुसारेण आरण्यकानि अपि बहूविधानि वर्तन्ते। तेषु कानिचित् विशिष्टानि आरण्यकानि सन्ति तद्यथा ऐतरेयारण्यकं, बृहदारण्यकं, शांख्यायनारण्यकं तैत्तिरीयारण्यकं चेति। आरण्यकानि प्रपाठकेषु विभक्ताः सन्ति। ते च अनुवाकेषु विभक्ताः सन्ति। महाव्रतस्य अनुष्ठानवर्णनं-निष्कैवल्यशास्त्रप्राणविद्या पुरुषप्रभृतीनाम् वर्णनं केषुचित् स्थलेषु ब्रह्मविद्यायाः गूढतया विस्तारेण च वर्णनमपि भवति। एतानि कस्मिन् वेदे प्रपाठके अनुवाके च वर्तन्ते, तदपि अत्र उपपाद्यते।

## उद्देश्यानि

- ऋग्वेदस्य आरण्यकाणि कानि इति ज्ञानं जायते।
- यजुर्वेदस्य आरण्यकाणि कानि इति ज्ञानं जायते।
- ऋग्वेदस्य प्रातिशाख्यानि कानि इति ज्ञानं जायते।
- यजुर्वेदस्य प्रातिशाख्यानि कानि इति ज्ञानं जायते।

- गृह्यसूत्रविषयेज्ञानं प्रभविष्यति।

## ऋग्वेदस्य विभागः

यद्यपि महाभाष्ये ऋग्वेदस्य एकविंशतिसंख्यकाः शाखा निर्दिष्टाः, तत्र अपि च शाकल-वाष्कल- आश्वलायन-शांख्यायन-माण्डूकायन-नामधेयाः पञ्च मुख्याः शाखाः सन्ति। स ऋग्वेदः सूक्त-मण्डलभेदेन द्विधा विभक्तः। तत्र सूक्तं चतुर्विधम्, ऋषिसूक्त-देवतासूक्त-च्छन्दः सूक्त-अर्थसूक्तभेदात्। येषां मन्त्राणाम् ऋषिः एकः एव वर्तते तेषां समूहः ऋषिसूक्तम्। येषां मन्त्राणाम् देवता एका वर्तते तेषां समूहः हि देवतासूक्तम्। यावदर्थसमाप्तानां मन्त्राणां समूहः अर्थसूक्तम्। सुष्ठुक्ततत्वात्सर्व सूक्तमित्याख्यायते। स ऋग्वेदः मण्डल-अनुवाक-वर्गभेदेन अष्टक-अध्याय-सूक्तभेदेन अपि च द्विधा।

उपर्युक्तभागद्वयस्य प्रथमभागे हि बालखिल्यसूक्तानि विहाय सम्पूर्णायां ऋग्वेदसंहितायां दश मण्डलानि, पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरद्विशतमिताश्च वर्गाः सन्ति। द्वितीये अपि च भागे अष्टौ अष्टकानि, चतुष्षष्टिरध्यायाः, सप्तदशोत्तरसहस्राणि अपि च सूक्तानि अपि च सन्ति।

## <u>प्रातिशाख्यम्</u>

शाखां शाखां प्रति प्रतिशाखं प्रतिशाखं भवं प्रातिशाख्यम्। वैदिकं व्याकरणम्।प्रातिशाख्यस्य स्थानं वेदाङ्गेषु महत्त्वपूर्णमस्ति, यतो हि-अस्य प्रसक्तिः शिक्षा छन्दो-व्याकरणेषु त्रिषु वेदाङ्गेषु प्रसरति ।शिक्षायाः, छन्दसः, व्याकरणस्य च प्रभावो लौकिके क्षेत्रे त्वस्त्येव--एवं वैदिके क्षेत्रेऽपि-उपर्युक्तप्रयोजनसिद्धयर्थं विद्यते । एतत् प्रयोजनमुद्दिश्य उव्वटकृते ऋक्प्रोतिशाख्ये प्राप्यते । तत्रोक्तं यत्

**'शिक्षाछन्दोव्याकरणः सामान्येनोक्तलक्षणम् ।**

**तदेवमिह शाखायामिति शास्त्रप्रयोजनम् ॥**

अत्रेदं तात्पर्यमस्ति यत्-शिक्षा, छन्द. व्याकरणञ्च सामान्यनियमानां वर्णनं करोति । त एव नियमास्तद्वैदिकी-शाखायां कथं सन्त्येतदेव प्रतिपादनं प्रातिशाख्यस्य मुख्यं प्रयोजनमस्ति ।

अत्रायं निष्कर्षः-'प्रातिशाख्यम्' व्याकरणस्यैको ग्रन्थः, यस्मिन् स्वरसन्धेस्त थान्यवर्णपरिवर्तनानां नियमानामुल्लेखो वर्तते । ये नियमा वेदस्य कस्यामपि शाखायां प्राप्यन्ते, येषु च स्वराघातसहितोच्चारणपद्धतिनिर्दिष्टा विद्यते ।अपरञ्च 'प्रातिशाख्यम्' वेदस्य लाक्षणिको ग्रन्थः, येन वेदस्य बाह्यस्वरूपं निदिष्टं विद्यते ।

वेदाभ्यासः पञ्चधा विद्यते । तद्यथा-अध्ययनम्, विचारः, अभ्यासः, जपः अध्यापनञ्च । एतदेव स्मारयति महाकवेः श्रीहर्षस्येयमुक्ति: --"अधीतिबोधाचरण प्रचारणैर्दिशा चतस्रः प्रणयन्नुपाधिभिः" । अस्मिन् पद्ये जपस्याभावो दृश्यते । अस्तु । उपर्युक्तानां पञ्चानामध्ययनादीनां ऋक्प्रातिशाख्यसूत्रेषु यथाविधिवर्णनमुप लभ्यते ।

एषु अध्ययनन्तु वेदश्रवणस्य द्योतकमस्ति । विचारादयो मननपक्षस्य द्योतकाः सन्ति । विचारश्च द्वेधा प्रवर्तते-अर्थतः लक्षणतश्च । अस्य महन्माहात्म्यं प्रकटयतो निरुक्तकारस्य यास्कस्य समीचीनेयमुक्तिरस्मा नुवोधयति, तद्यथा -

**'स्थायुरयं भारहरः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम् ।**

**योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा' ॥**

अत्रायमाशय:-यो हि वैदिको वेदमधीत्य तदर्थं न विजानाति स उपहासास्पदो भारवाही स्थाणुरिव, शुष्कवृक्ष इव वृषभ इव वा विद्यते । यो हि पद-पदार्थं विजानाति, स एव समस्तं श्रेयस्त्वं प्राप्नोति । लोके परलोके च यशस्वी विद्यते ।

निष्कर्षश्चायमत्र-प्रातिशाख्यस्य परिधिः पूर्वोक्तानि श्रीणि वेदाङ्गानि स्वस्मिन् समायोजयति, तथा च तद्विशिष्टशाखायां सम्भावितानां विशेषनियमानां विवरणं प्रस्तौति । महर्षिणा पाणिनिना स्वरवैदिके.-'ऋचि तुनुघमक्षुतकुत्रोरुष्याणाम्' इत्यस्मिन् सूत्रे ऋक्क्षु, तु, नु, घ, मक्ष, तङ्, कुत्र, उरुष्य इत्येतेषां पदान! व्यञ्जने परभागे स्थिते दीर्घविधानं कृतमस्ति । अयन्तु सामान्यो नियमः परञ्च । प्रातिशाख्यस्य विधानानुसारमस्यां शाखायां दीर्घविधानं सर्वस्मिन् काले न विद्यते शब्दा ह्रस्वभावे एव तिष्ठन्ति । फलतः 'आ तू न इन्द्र मघवन्' इत्यस्मिन् यत्र 'तु' इत्यस्य दीर्घभावस्तत्रैवान्यत्र तत्तु प्रयः प्रलया ते" इत्यस्मिन दीई स्याभावो दृश्यते । अनेनैव प्रकारेण शिक्षायाः छन्दसश्च नियमानां विषये ज्ञातव्यः । इति विधानानुसारं प्रातिशाख्यमेतेषां त्रयाणां वेदाङ्गानां नियमानां विशेषरूपेण सञ्चालन करोति । अपरः पक्षश्चास्ति यत् प्रातिशाख्यस्य सर्वतन्त्रस्वतन्त्रा सत्ताऽस्तीति । शिक्षायां छन्दसि व्याकरणे च येषां नियमानां विधानं कृतमस्ति तद्भिन्ननियमाना विधानमस्मिन् प्रातिशाख्ये शास्त्रे विद्यते । एतादृशा विषयाः सन्तिक्रमः, क्रम हेतुः, पारायणादयश्च । प्रातिशाख्यं कस्यापि शास्त्रस्याङ्गे स्वीकृते-अस्य पूर्णतायाः ह्रासो विद्यते । परञ्चास्ति तच्छास्त्रमनिन्द्यमार्ष पूर्ण वेदाङ्गं यत् स्वसत्तायै कस्यापि शास्त्रस्यापेक्षां न करोति ।

प्राचीने भारते संस्कृतभाषाया व्याकरणमेभ्यः प्रातिशाख्येभ्यः प्रारभ्यते । प्रातिशाख्यस्य शास्त्रेषु स्वतन्त्रा सत्ता विद्यते । प्रातिशाख्यग्रन्थेषु व्याकरणसमथिता नामनेकानां विषयाणां प्रतिपादनमस्ति । अपि चैषु ग्रन्थेषु प्राचीनानां वैयाकरणानां नामान्युपलभ्यन्ते । वैदिके काले व्याकरणशास्त्रस्याभ्युदयस्य पर्याप्त सूचकमिदं प्राति शाख्यं शास्त्रम् ।

महर्षिणा शौनकेन ऋक्प्रातिशाख्ये एतादृशाः सूक्ष्मातिसूक्ष्मा नियमा निर्दिष्टाः, यद्बलेन वयं कथयितुं समर्थाः स्मः यत्-ऋग्वेदस्य मूलपाठे अद्यापि विकृते काले न कापि क्षतिरवलोक्यते । एतत् प्रातिशाख्यस्यैव वैशिष्टयम् ।

प्रातिशाख्यानां शिक्षाधर्मिता- अस्मिन् विषये शिक्षासंग्रहप्रस्तावनायामाचार्य पादैस्त्रिपाठिभिरुक्तं यत्-वेदानां स्वरूपरक्षायां शिक्षा-व्याकरणादीनां यावन्महत्त्व मस्ति न तत ईषदपि अल्पं प्रातिशाख्यानां महत्त्वम्, प्रत्युत अस्मिन् अंशे प्राति शाख्यानि शिक्षा व्याकरणादिभ्यो विशेष्यन्ते एव, यद् व्याकरणादीनि प्रायो वेदे सामान्ये विषयकाणि प्रातिशाख्यानि तु शाखाविशेषमवलम्ब्यैव प्रवृत्तानि ।

## **ऋग्वेदीयारण्यकम्**

ऋग्वेदस्य द्वयोः आरण्यकयोः अन्यतमम् इदम् आरण्यकमस्ति । इदमारण्यकम् ऐतरेयब्राह्मणस्यैव परिशिष्टभागः वर्त्तते । अस्मिन् पञ्च आरण्यकानि विद्यन्ते। इमानि आरण्यकानि भिन्नग्रन्थरूपेण मन्यन्ते।

### **ऐतरेयारण्यकम्**

प्रथमारण्यकभागे महाव्रतस्य वर्णनं विद्यते। महाव्रतमिदम् ऐतरेयब्राह्मणस्य प्रपाठकत्रयस्य एकांशोऽस्ति । द्वितीयप्रपाठकस्य प्रथमत्रिषु अध्यायेषु उक्थ-निष्कैवल्य-शस्त्र- प्राणविद्या-पुरुषप्रभृतीनां विवेचनं कृतमस्ति। चतुर्थ-पञ्चम-षष्ठाध्यायेषु ऐतरेयोपनिषद् भवति। तृतीयारण्यकस्य अपरं नाम भवति संहितोपनिषद् वर्तते । अस्याम् उपनिषदि संहिता-पदक्रमपाठानां वर्णनं तथा स्वरव्यञ्जनादिस्वरूपस्य च विवेचनमस्ति।खण्डे अस्मिन् शाकल्यस्य माण्डुकेयस्य च मतानाम् उल्लेखोऽस्ति। अयम्

अंशः असन्दिग्धरूपेण प्रातिशाख्यनिरुक्ताभ्यां प्राचीनतरः वर्तते। व्याकरणविषयस्य अपि अयमंशः नितान्तं प्राचीनः भवति। एतेन अस्य आरण्यकस्य समयस्य पूर्वसीमा विक्रमपूर्वसहस्रशतकम् इति मन्तव्यं। तेन आरण्यकमिदं यास्कपूर्ववर्ति इति मन्यन्ते नैके। यतः एतस्मिन् भागे निर्भुज-प्रतृण्ण-सन्धिसंहितादयः पारिभाषिकशब्दाः प्रयुक्ताः वर्तन्ते। चतुर्थारण्यकम् अतीव लघु विद्यते। अस्मिन् आरण्यके महाव्रतस्य पञ्चमे दिने प्रयोक्तव्या महानाम्न्यः ऋचः विद्यन्ते। अन्तिमारण्यके निष्कैवल्यशस्त्रस्य वर्णनमस्ति। एतेषु आरण्यकेषु प्रथमत्रयस्य रचयिता ऐतरेयः, चतुर्थस्य आश्वलायनः तथा पञ्चमस्य शौनक इति । एषःशौनको बृहद्देवतायाः निर्माता विद्यते । डा० कीथमहोदयः आरण्यकमिदं निरुक्तात् परं प्रणीतम् इति विज्ञाय अस्य समयं विक्रमपूर्वं षष्ठशतकं मन्यते। एवं यथार्थत आरण्यकमिदं निरुक्तात् प्राचीनतरमस्ति। आरण्यकम् एतत् महिदास ऐतरेयस्य प्रथमत्रयाणाम् आरण्यकानां कर्तृत्वेन ऐतरेयब्राह्मणस्य एव समकालिकम् इति सिध्यति।

**शाङ्ख्यायनारण्यकम्**

ऋग्वेदस्येदं द्वितीयारण्ये पञ्चदश आध्यायाः सन्ति। आतृतीयाध्यायात् षष्ठ्याध्यायपर्यन्तं कौषीतकि-उपनिषदिति कथ्यते, तथा सप्तमाष्टमौ अध्यायौ संहितोपनिषदिति उच्येते । एतद्भिन्नेषु अध्यायेषु आरण्यकस्य मुख्यविषयाणां विवेचनमस्ति। प्रथम-द्वितीयाध्याययोः महाव्रतस्य वर्णनम् उपलब्धमस्ति। अत्र एकः गवामयन-नामकयज्ञः भवति। तस्य यज्ञस्य यः अन्तिमदिवसः ततः पूर्वस्मिन् दिवसे महाव्रतस्य अनुष्ठानं क्रियते। अस्मिन् एव दिने सवनत्रयमपि विद्यते। अस्मिन् आरण्यके होतृनामकः यः ऋत्विक् विद्यते तेन प्रयुक्तानां शास्त्राणां वर्णनं विद्यते। महाव्रतस्य सर्वाणि आनुष्ठानिकानि विधानानि शाङ्खायनश्रौतसूत्रे वर्तते। अस्य अनुष्ठानस्य सर्वतः महत्त्वपूर्णम् अङ्गं महदुक्थम् अथवा निष्कैवल्यशस्त्रम्भवति। अस्य सविस्तृतं वर्णनं तत्र एव अन्येषु अध्यायेषु उपलभ्यते।

कौषीतकिब्राह्मणोपनिषद् चतुर्षु अध्यायेषु विभक्ता सन्ति। इयं उपनिषत् शाङ्खायनारण्यकस्यैव अंशो वर्तते। इयं कौषीतकिब्राह्मणोपनिषत् तथा संहितोपनिषत् च अध्यायस्य पुरोभागे वर्तेते। एते द्वे उपनिषदौ शाङ्खायनारण्यकस्य अङ्गमस्ति। अस्य वर्णनमुपनिषदां वर्णनप्रसङ्गे अग्रे क्रियते। नवमाध्याये प्राणस्य श्रेष्ठताया वर्णनं कृतमस्ति। दशमाध्याये आन्तराग्निहोत्रस्य साङ्गोपाङ्गम् इत्यादिकं वर्णितमस्ति। अस्य अध्यायस्य तात्पर्यमस्ति यद् अग्निहोत्रेण यस्य देवस्य सन्तृप्तिः क्रियते, यस्य वा देवस्य आप्यायनं विधीयते, स देवः जीवस्य अभ्यन्तरे एव विद्यमानः विद्यते। बाह्याग्निहोत्रेण अस्य तृप्तिर्भवति। यो हि साधकः तत्त्वमिदम् अविज्ञाय केवलं बाह्यहवने एव आसक्तो विद्यते, सः भस्मे एव जुहोति। मृत्योः अपसारणाय एकस्य विशिष्टयागस्य विषये अस्य ग्रन्थस्य एकादशतमाध्याये विस्तृतं विवरणं प्रदत्तमस्ति। द्वादशतमाध्याये बिल्वफलेन मणिनिर्माणस्य प्रक्रियायाः वर्णनं, कालस्य तथा स्वरूपस्य च वर्णनं विद्यते। यं साधयित्वा साधकः शत्रूणामुपरि विजयं प्राप्नोति। त्रयोदश-चतुर्दशयोः अध्यायययोः अतिसंक्षेपेण आत्मनः ब्रह्मणा,आरण्यकम् उपनिषदैःसह एकत्वप्राप्तिः जीवस्य सर्वोत्तमोपलब्धिः इति वर्ण्यते। 'आत्मावगम्योऽहं ब्रह्मास्मीति' इयम् एव उक्तिः अस्यारण्यकस्य सर्वोत्तमः उपदेशः भवति।

पञ्चदशतमाध्याये आचार्यस्य वंशवर्णनमस्ति। एतेन अध्यायेन स्पष्टरूपेण ज्ञायते यद् अस्य आरण्यकस्य द्रष्टुः ऋषेर्नाम गुणाख्यशाङ्ख्यायनः आसीत् इति। तस्य गुरोर्नाम कहौलः कौषीतकिः इति आसीत्। उभौ एतौ अन्तिमाचार्यौ वर्तेते। एतेन एव कारणेन अस्य शाङ्ख्यायनारण्यकस्य अन्तर्गता उपनिषद् कौषीतकिनाम्ना विख्याता वर्तते।

## **ऋक्प्रातिशाख्यम्**

प्रातिशाख्यग्रन्थेषु ऋक्प्रातिशाख्यं प्राचीनतायाः प्रामाणिकतायाश्च विषये स्वमहत्त्वपूर्ण स्थान निर्धारयति । परिषदि प्रचारितत्वात्- एतत् प्रातिशाख्यं पार्षद पारिषदं सूत्रं वेति नाम्ना प्रख्यातमस्ति । विष्णुमित्रेणास्य पार्षदस्य रचयिता शौनकः स्वीकृतः । प्रातिशाख्यमिदं शिक्षाविषयप्राधान्यात् शिक्षाशास्त्रमिति नाम्नाऽपि व्यवह्रियते।

अस्मिन् प्रातिशाख्ये ऋग्वेदस्यकमात्रोपलब्धायाः शाखायाः शैशिरीयोपशाखायाः साङ्गोपाङ्गं विवेचनमस्ति, तेनास्य रचयितुः शौनकस्य भाषाशास्त्रीयमध्ययनं प्रमाणितं विद्यते ।

**मण्डलक्रमः**

ऋग्संहितायाः द्वितीयः क्रमः मण्डलक्रमः, एषः ऐतिहासिकदृष्ट्या वैज्ञानिकदृष्ट्या अपि च महत्त्वपूर्णः भवति। बालखिल्यसूक्तानि विहाय सम्पूर्णे ऋग्वेदे दशमण्डलानि, पञ्चाशीतिश्चानुवाकाः, अष्टोत्तरशतद्बयमिताश्च वर्गाः वर्तन्ते। अत्र अपि च अनुवाकेषु सूक्तानि, सूक्तेषु मन्त्राश्च परिश्रमपूर्वकं निर्धारिताः सन्ति। अस्माकं प्राचीनैः ऋषिभिः वेदानां विशुद्धये तेषु प्रयुक्तानाम् अक्षराणामपि गणना विहिता। मन्त्राश्च सर्वे सप्तषष्ट्युत्तरचतुःशताधिकदशसहस्रमिताः (१०४६७) इति शाकल्यर्षिः, शौनकानुक्रमण्यः तु अशीत्युत्तर-पञ्चशताधिक-दशसहस्रमितान् (१०५८०) मन्त्रान् आहुः। अत्र भेदे खिलभेदेन कालभेदेन वा मन्त्रवृद्धिलोपावेव हेतुतयोन्नयौ भवतः । शब्दसंख्या १५३८२६, अक्षरसंख्या ४३२०००। चतुर्दशसु छन्दःसु सर्वेऽपि मन्त्राः विभक्ताः इति बोध्यम्। गृत्समद-विश्वामित्र- वामदेवा-अत्रि-भरद्वाज-वशिष्ठादयः ऋग्वेदगतमन्त्रद्रष्टारो ऋषयः भवन्ति। मण्डलानुसारेण सूक्तानां व्यवस्था (१९१+४३+६२+५८+८७+१०४+९२+११४+१९१) एवमस्ति। एतेषां सूक्तानामतिरिक्तानि एकादश सूक्तानि अपि च बालखिल्यनाम्ना भवन्ति।

एतस्य 'बालखिल्य'-सूक्तानां स्थानं तु अष्टममण्डलान्तर्गते एव स्वीक्रियते। अस्मिन्मण्डले प्रमुखसूक्तानि आहत्य द्विनवतिः भवन्ति। खिलसूक्तानां सङ्कलनं कृत्वा तेषां संख्या त्र्यधिकशतमिता सम्भवति। खिलशब्दास्यार्थो वर्तते 'परिशिष्टम्' अथवा पश्चात्सङ्कलितमन्त्राः। स्वेनैव यदा अध्ययनं क्रियते तदैव खिलपठनस्य व्यवस्था वर्तते। किञ्चैते खिलमन्त्राः कुत्रापि न उपलभ्यन्ते, न चाक्षरगणनायाम् एव एतेषां मन्त्राणां समावेशोऽपि भवति। एतेषां यथार्थरूपस्याऽपि बोधो न वर्तते । एतेषामृग्वेदे स्थानम् अष्टममण्डलस्यान्तराले ऊनपञ्चाशत्तमात् सूक्तादारभ्य ऊनषष्टितमं सूक्तपर्यन्तमस्ति। एतेषां मन्त्राणां संख्याऽशीतिरस्ति। अनुवाक-अनुक्रमानुसारेण अपि च एतेषां मन्त्राणां संख्या दशसहस्र-पञ्चशत-अशीतिरस्ति-

**'ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।**

**ऋचामशीतिः पादश्च पारणं सम्प्रकीर्तितम् ।। '४३।।**

ऋचां शब्दानां संख्या १५३८२३ वर्तते। यथा-

**'शाकल्यदृष्टेः पदलक्षमेकं सार्धं अपि च वेदे त्रिसहस्रयुक्तम्।**

**शतानि चाष्टौ दशतद्वयं अपि च पदानि षट् चेति हि चर्चितानि ।।**

तथा शब्दगताक्षरणां संख्या ४३२००० वर्तते। तद्यथा-

**'स ऋचो व्यौहत्। द्वादशबृहतीसहस्राणि। एतावस्तौ ह्यर्चीयाः प्रजापतिसृष्टाः'**

**'बृहतीच्छन्दः षट्त्रिंशदक्षराणां भवति। अतः १२०००*३६-४३२००० वर्तते चत्वारिंशत्सहस्राणि द्वात्रिंशच्च अक्षरसहस्राणि.**

ऋग्वेदस्य शब्दाक्षरादीनां गणनाप्रसङ्गे यत्र तत्र पार्थक्यमपि परिदृश्यते। मालावारीयेण नारायणभट्टेन विरचितः सूक्तश्लोकः समुपलब्धो भवति। ग्रन्थेऽस्मिन् ऋग्वेदस्य

वर्गाणां सूक्तानाञ्च संख्या निर्धारिताऽस्ति। वर्गसूक्तादीनां गणनाप्रतिपादकश्लोकस्तथा तद्विवरणञ्च निम्नरूपेणास्ति-

**जानन्नपि द्विषामोदं स यज्ञः पातनानरः।रसं भिन्नाय मांसादो नरस्तस्य जलाधिपः ।।**

**नारायणभट्टेन दत्तमृग्वेदस्य विवरणम् -**

अष्टकानि - ८

मण्डलानि - १०

अध्यायाः - ६४

अनुवाकाः - ८५

सूक्तानि - १०१७

ऋक्संहितासाहित्यम् वर्गाः - २००६

ऋचः - १०४७२

अर्धर्चः - २०८७५

शब्दाः - १५३८१६

अक्षराणि - ३९४२२१

उपरिनिर्दिष्टायां संख्यायां बालखिल्यसूतानां गणना न वर्तते, यदि तान्यपि ११ सूक्तानि, ८० ऋचः, १८ वर्गाः, ३०४४ अक्षराणि अपि सङ्कलितो भवेत्तदा, सूतानां संख्या १०२८, वर्गाः २०२४, ऋचः १०५५२ तथा अक्षराणि ३, ९७, २६५ भवन्ति ।

पुराणादिषु आरण्यकस्य आचार्यत्वेन शौनकस्य नाम उल्लिखितमस्ति 'शौनको नाम मेधावी विज्ञानारण्यके गुरुः' (पद्मपुरा० ५।१।१८) पुराणस्य वाक्यमिदं यथार्थमस्ति। यतः आचार्यशौनकः ब्रह्मवेत्ता ऋषिः आसीत्। स वेदानाम् अध्यात्मपरकं व्याख्यां कृतवान्। यतः अस्य वामीयभाष्ये आत्मानन्देन उल्लिखितम्- 'अध्यात्मविषयां शौनकादिरीतिम्'। पद्मपुराणस्य विज्ञानारण्यकशब्दोऽपि आरण्यकस्वरूपस्य परिचायकोऽस्ति। आरण्यकं विज्ञानस्य, विशिष्टज्ञानस्य, अध्यात्मज्ञानस्य वा बोधकग्रन्थः वर्तते, इत्यपि एतेन ज्ञायते।

आरण्यकस्य महत्त्वं सर्वत्र अङ्गीकृतमस्ति। महाभारतस्य उक्तिः वर्तते यद् औषधीभ्यो यथा

अमृतम् उद्धृतं तथैव वेदेभ्यः सारं समुद्धृत्य आरण्यकं प्रणीतम् भवति। यथा-

**'आरण्यकञ्च वेदेभ्य ओषधिभ्योमृतं यथा।' (महाभा० १।२६५)**

मन्त्रब्राह्मणात्मकस्यास्य वेदस्य यस्मिन् भागे प्राणविद्यायाः प्रतीकोपासनायाश्च विषये वर्णनं वर्तते स एव अंशः आरण्यकमिति उच्यते। आरण्यकमपि ब्राह्मणस्यैव अंशः विद्यते। तस्य विशिष्टताप्रदर्शनाय 'रहस्यब्राह्मणम्' इति नाम अपि प्रसृतम् वर्तते। निरुक्तस्य टीकायां (१।४) दुर्गामहोदयेन 'ऐतरेयके रहस्यब्राह्मणम्' इति उत्वा ऐतरेयारण्यकस्य उद्धरणं दत्तम् (२।२।१)। एतेन रहस्यब्राह्मण- आरण्यकयोः एकत्वं सिध्यति, आरण्यकस्यैव नामान्तरं रहस्यमपि भवति।

यतो हि यथा आरण्यकं यज्ञीयगूढरहस्यस्य प्रतिपादनं विदधाति तथैव कर्मकाण्डस्य दार्शनिकव्याख्याम् अपि उपवर्णयति। मुख्यतः ब्रह्मविद्या इति पदं रहस्यशब्देन ज्ञायते। विषयविवेचनस्य दृष्ट्या आरण्यकेन सह उपनिषदः साम्यमस्ति। अतो बृहदारण्यकादिग्रन्थाः उपनिषदिति शब्देन अपि व्यवह्रियन्ते। एवं वर्णनीयविषयस्य

साम्यत्वेन अपि तयोः किञ्चित् पार्थक्यं परिदृश्यते। आरण्यकस्य मुख्यविषयः प्राणविद्या तथा च प्रतीकोपासना भवति।

ऋग्वेदीयदशममण्डलस्य नैकेषु सूक्तेषु लौकिक-व्यावहारिक-विषयाणाञ्च रोचकं वर्णनमस्ति । इत्थं विषयाः तु अथर्ववेदस्यैव विशिष्टसम्पदः मन्यन्ते । किश्च ऋग्वेदस्य दशममण्डलेऽपि एवंविधलोकसंस्कृत्या सह सम्बद्धविषयाणां समुपलब्धिः अस्य मण्डलस्य विशेषतां सूचयति । यक्ष्माख्याव्याधिर्विनाशाय १६१, १६३ तथाऽन्यान्यनेकविधानि च सूक्तानि सन्ति। रक्षोहासूक्ते दानवात् गर्भत्राणार्थः मन्त्रोऽस्ति । एकस्मिन् सूक्ते पत्न्याः कष्टमपहाय पत्युः प्राप्त्युपायस्य विवरणं लभते। यथा

**'इमां खनाम्योषधिं वीरुध बलवत्तमम्।**

**यया सपत्नीं बाधते यया संविन्दते पतिम्॥**

अपरस्मिन् सूक्ते शत्रु-संहाराय प्रार्थना वर्तते -

**'ऋषभ मां समानानां सपत्नानां विषासहितम्।**

**हन्तारं शत्रूणां कृधिविराजं गोपतिं गवाम् ॥**

एतेन प्रकारेण १०।१६४ सूक्ते दुःस्वप्नविनाशाय प्रार्थना भवति। १०/५८ सूक्तस्य नाम एव 'मनः-आवर्तनम्' सूक्तमस्ति । वैवस्वत-यम-दिव-भूमि-समुद्रादीनां पार्श्वगतानां जनानां मनसा परावर्त्तनार्थाय प्रार्थनाऽस्ति-

**यत् ते यमं वैवस्वतं मनो जगाम दूरकम् ।**

**तत्त आवर्तयामसीह क्षयाय जीवसे ॥'**

एकस्मिन् सूक्ते आथर्वण भिषगृषिः औषधीनां भव्यस्तुतिं समुपस्थापयति -

**'याः फलिनीय अफला अपुष्पा याश्च पुष्पिणीः।**

**बृहस्पति-प्रसूतास्ता नो मुञ्चत्वं हसः॥**

एकस्मात् सूक्तात् ज्ञातो विद्यते यत्, प्राचीनकालेऽपि प्रजा एव राज्ञः वरणमकुर्वन् । यथा -

**अभित्वा देवः सविताभि सोमो अवीवृतत्।**

**अभित्वा विश्वाभूतान्यभिवर्चो यथाससि।।**

## श्रद्धासूक्तम्

ऋग्वेदस्य दशममण्डले श्रद्धासूक्तमस्ति।सूक्तेऽस्मिन् श्रद्धायाः स्तुतिः देवतारूपेण । अत्र मन्त्रास्तु षड् एव सन्ति, एवं विषयस्य अपूर्वत्वेन स्वल्पकायमपीदं सूक्तं विपूलमहत्त्वस्याभवत्। श्रद्धाशब्दस्य अर्थो विद्यते - कस्मिंश्चित् कार्यविशेषे अथवा वचनविशेषे स्वान्तःकरणेन आदरातिशयस्य भावना। वस्तुतः श्रद्धया सम्पादितं कार्यमेव लाभदायकं विद्यते । श्रद्धाविहीनं कर्म कदापि फलदायकं न विद्यते। ९॥११३२ मन्त्रे ऋत-सत्याभ्यामतिरिक्तस्य श्रद्धया सोम-सवनस्य विधानं दर्शितमस्ति । सोमस्याभिषवः यजमानस्य श्रद्धां प्रकटयति (श्रद्धां वदन् सोमराजन् ९॥११३॥४)। ऋषिभिः कृतस्तोत्रं श्रद्धासमन्वितमनसा इन्द्रेण श्रुतम् (श्रद्धामनस्या शृणुतेदभीतये) । वाक्सूक्तेकथितमस्ति - 'श्रुधि श्रुत श्रद्धिवं ते वदामि' ॥ अत्र 'श्रद्धिव' इति पदस्य सायणेन कृतमर्थम्- 'श्रद्धाबलेन लभ्यं ब्रह्मात्मकं वस्तु अर्थात् 'बह्म' श्रद्धया ज्ञातो विद्यते, उपलब्धोऽपि च विद्यते । अन्येषु मन्त्रेष्वपि ऋषीणां श्रद्धां प्रति अतीव पूज्या भावना वर्त्तते । श्रद्धासूक्ते तु देवतास्वरूपेणैव श्रद्धा चित्रिताऽस्ति । अस्य मन्त्रस्य ऋषिका श्रद्धाऽस्ति, या कामगोत्रजाऽस्ति, तेनैव कारणेन सा 'कामायनी' इति नाम्ना विख्याताऽस्ति ।

अस्य सूक्तस्य प्रथममन्त्रे एव स्पष्टीकृतमस्ति यत्, श्रद्धया एवाग्नेः समिन्धनं विद्यते । श्रद्धया आहवनीयाग्नौ आहुतिः देया विद्यते इति। अस्य तात्पर्यमिदमस्ति यत्, यज्ञीयकार्येषु श्रद्धायाः महती आवश्यकता वर्त्तते । अग्निमन्त्रः ज्ञानाग्नेः प्रतीकमपि वक्तुं शक्यते । ज्ञानाग्नेः समिन्धनमपि श्रद्धया एव सम्पादितं भवेत् । विशाला हि श्रद्धायाः व्यापकताऽस्ति । अस्याः उपासना न केवलं मानवाः कुर्वन्ति, अपि तु देवता अपि असुरैः सह युद्धकाले श्रद्धायाः आश्रयं गृहीत्वा स्वकीयमनोरथं साधयितुं कृतकार्या विद्यन्ते । अपरस्मिन् मन्त्रे मनोवैज्ञानिकतथ्यस्य रोचकं विश्लेषणं वर्त्तते—

श्रद्धां हृदय्ययाकूत्या श्रद्धया विन्दते वसु ।।' हृदये समुत्पन्नसङ्कल्पेन श्रद्धायाः उपासना विद्यते । प्रथमस्तु साधकस्य चित्ते सङ्कल्पस्योदयो विद्यते, तदनन्तरमेवासौ कस्मिंश्चिदपि कार्ये स्वनियोगं करोति । श्रद्धया धनस्य प्राप्तिर्भवति । अत्र 'वसु' इत्येतत्पदेन भौतिकद्रव्यस्य सङ्केतो न विद्यते, प्रत्युत आध्यात्मिककल्याणस्य । आध्यात्मिकं वसु भवति— अज्ञानस्य विनाशं कृत्वा अमरत्वस्य प्राप्तिः । अमरतायाः समुपलब्धेः प्रधानसाधनमियमेव श्रद्धा वर्त्तते । अन्तिमा प्रार्थना- 'श्रद्धे श्रद्धापये ह नः ॥' उपनिषत्सु श्रद्धातत्त्वस्य यद् विपुलं उपबृंहणमस्ति, तस्य बीजमस्मिन्नेव प्रख्यातसूक्ते एव भवति। ऋग्वेदस्य दशममण्डले बहुविधानुशीलनेन ज्ञातो विद्यते, तदा देवस्य किंवा देवाधिदेवस्य कल्पना दृढमूला विद्यते। प्रधानदेवोऽयं कुतश्चित् हिरण्यगर्भरूपेण, कुतश्चित् पुरुषरूपेण, क्वाऽपि प्रजापतिनाम्ना ख्यातोऽभवत् । हिरण्यगर्भस्य विषये प्रसिद्धसूक्तमिदमस्ति, यस्य अन्तिमचरणमिदमस्ति- 'कस्मै देवाय हविषा विधेम ॥' अस्य चरणस्य कल्पनायां वेदज्ञानां विभिन्नाः सम्मतयः सन्ति । पाश्चात्यविदुषां मते अस्य सूक्तस्य द्रष्टा ऋषिः वस्तुतः सन्दिग्धचित्तेन पृच्छति - 'कस्मै देवाय हविषा विधेम ।' इति। प्रारम्भिकयुगस्य मानवानां कौतुकाक्रान्तचित्तस्य दशायां द्योतकमिदं सूक्तं प्रकटयति यत्, केन प्रकारेणादिमयुगस्य जनस्तस्या देवतायाः स्वरूपं ज्ञातुमिच्छति, यस्मै देवाय सः हव्येन होमं करोति । ब्राह्मणग्रन्थेषु तथा तदनुसारिणः

निरुक्तादिग्रन्थेषु कः शब्दोऽत्र प्रजापतेः सूचकोऽस्ति । किं शब्दस्तु अनिर्वचनीयतायाः वाऽत्यन्तसौख्यस्य सूचको वर्तते। फलतः नाम्ना रूपेण वानिर्वचनीयाभावेऽपि सुखरूपत्वेन प्रजापतये किं शब्दस्य व्यवहारः नितान्तं युक्तियुक्तोऽस्ति । उपनिषत्स्वपि अनयाऽनिर्वचनीयतयाऽसौ 'परमतत्त्वम्' 'नेति नेति' इति शब्देनाभिव्यक्तं विद्यते । हिरण्यगर्भः अग्रे सृष्ट्यादौ विद्यमानः आसीत् । असावेव सर्वेषां समुत्पन्नानां प्राणीनां रक्षकः आसीत् । स एव हि समस्तं विश्वं बिभर्ति । जाग्रत्-स्वप्न-सुषुप्तावस्थायामेकम् एवाऽसौ समग्रभूतानां राजा ( शासकः ) भवति । नास्त्येतावदेव अपि तु मृत्योरप्युपरि शासनं करोति । अमृतत्त्वं तस्य छाया वर्त्तते ( यस्य छायाऽमृतं यस्य मृत्युः ) । यथा छाया पुरुषस्य अनुसरणं करोति, तथैवा अमृतत्त्वमपि तस्य हिरण्यगर्भस्य अनुसरणं करोति । तस्यैव अध्यक्षतायां समस्तसृष्टेः व्यापारः सञ्चलति । सकलसृष्ट्याः पालनस्य संरक्षणस्य च कार्यं तस्यैवाधीनमस्ति। देवेष्वसौ अद्वितीयदेवोऽस्ति।

## पुरुषसूक्तम्

दशममण्डले स्वदार्शनिकविचाराय, निजमहत्वाय, गाम्भीर्याय, अन्तःपर्यवेक्षणाय च पुरुषसूक्तं ( १०।।९० ) नितान्तं विख्यातमन्यतमश्चाऽस्ति । अस्मिन् सूक्ते पुरुषस्याध्यात्मिककल्पनायाः भव्यं निदर्शनमस्ति । पुरुषस्यास्य सहस्राणि शिरांसि, सहस्राणि अक्षीणि, तथैव पादाः च सन्ति । अर्थात् तस्मै पुरुषाय एतेषां शरीरावयवानां कापि इयत्ता नास्ति । अस्य विश्वस्य परिमाणादसावधिकोऽस्ति । विश्वमभितः स्थितस्य परिवेष्टनात् दशाङ्गुलिर्यः अग्रतरोऽस्ति । 'अत्यतिष्ठद् दशाङ्गुलम्' अत्र दशाङ्गुलं केवलं परिमाणाधिक्यस्य उपलक्षणमात्रमेवास्ति । विश्वस्य समस्तमरणशीलप्राणिनः तस्य पुरुषस्यैकचतुर्थांशमात्रमेव सन्ति । तस्यामृतत्रिपादः आकाशेऽवस्थितोऽस्ति । सः सर्वेषां शासको वर्त्तते । अस्य पुरुषस्य विषये विलक्षणं तथ्यमिदमेवाऽस्ति—

"पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ॥" ( मन्त्र० २ ) एक एवाऽसौ पुरुषः निखिले विश्वस्मिन् वर्त्तते, यः प्राचीनकाले समुत्पन्नोऽभवत्, यः भविष्येऽपि समुत्पन्नो भविष्यति । सर्वेश्वरवादस्यायं सिद्धान्तः पाश्चात्यपण्डितानां मते आर्याणां प्रौढ-दार्शनिक-विचारधारायाः परिचायकोऽस्ति । सृष्ट्याः समुत्पादने यज्ञस्य कल्पना कीदृशी जागरूका क्रियाशीला चासीद्, तस्याः अपि परिचयः अस्मिन्नेव सूक्ते वर्णितः। देवताः स्वयज्ञे पुरुषबलिं कृतवन्तः । तेन बलिना जगतः प्राणिनां समुत्पत्तिरभवत् । अस्मिन्नेव सूक्ते ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां समुत्पत्तिस्तस्य पुरुषस्य मुखाद्, बाहोः, ऊरोः, पद्भ्यां क्रमशः जाता । ऋग्वेदस्य कस्याप्यन्यस्मिन् मन्त्रे चतुर्णां वर्णानां चर्चा नाऽस्ति, येन प्रतीतो विद्यते, अस्मिन् समाजे तस्मिन्नेव युगे चतुर्णां वर्णानां कल्पना समुद्भूताः । एतेन प्रकारेण सूक्तमिदं वैदिकार्याणां सामाजिकाध्यात्मिक-धारणायाः परिचायकत्वेन नितान्तं महत्त्वपूर्णमस्ति ।

## ऋग्वेदीयशाखाः

### शाकलशाखा

इदानीम् ऋग्वेदस्य प्रचलिता संहितायाः शाकलशाखीया एव वर्तते । शाकलसंहितान्ते ऋक्परिशिष्टनाम्ना षट्त्रिंशत्सूक्तानि स्वीकृतानि सन्ति। एतेषां मध्ये कानिचन नितान्तप्रख्यातानि अनेकधा चर्चितानि अपि च सूक्तानि भवन्ति। यथा- श्रीसूक्तम् (सू.स. ११), रात्रिसूक्तम् (सू.स. २६), मेधासूक्तम्, शिवसङ्कल्पसूक्तम् । अस्य सूक्तस्य प्रत्येकं मन्त्रस्य चतुर्थचरणः 'तन्मे मनः शिवसङ्कल्पमस्तु' इति वाक्येन समाप्यते। वाष्कलशाखानुसारेण 'संज्ञानसूक्तम्' अन्तिमं सूक्तमस्ति ऋग्वेदस्य। पुराणेषु वैदिकमन्त्रदृष्ट्या समुद्धृताः सन्ति ऋगवशिष्टस्य मन्त्राः । श्रीसूक्तस्य मन्त्रद्वयम् - 'हिरण्यवर्णां हरिणीम्' 'गन्धद्वारां दुराधर्षाम्' पद्मपुराणे समुद्धृतौ स्तः 'सितासिते सरीते यत्र सङ्गते' इति च स्कन्दपुराणस्य काशीखण्डे तथा पद्मपुराणे, समुद्धृतोऽस्ति।

द्वयोः स्थानयोः मन्त्रोऽयं प्रयागपरो वर्तते। प्रयागे सिता=गङ्गा, तथा असिता-यमुना तयोः सङ्गमतीर्थस्य विपुलमहत्वस्य प्रतिपादकः अस्ति एषः मन्त्रः। ऋगवशिष्टस्य मन्त्राः पुराणेषु प्रमाणाय समुद्धृताः भवन्ति, तेन एते मन्त्राः विशेषसम्मानयोग्याः भवन्ति।

**वाष्कलशाखा**

अद्यत्वे वाष्कलशाखायाः संहिता समुपलब्धा न वर्तते तथाप्यस्याः विशिष्टतायाः वर्णनं विविधेषु स्थलेषु स्थाप्यते। शाकलशाखानुसारेण ऋग्वेदस्यान्तिमो मन्त्रः **'समानी व आकूतिः'**अस्ति, किञ्च वाष्कलसंहितानुसारेण **'तच्छ्रेयोरावृणीमहे'**इत्येव अन्तिमो मन्त्रोऽस्ति । अस्मादेव सूक्तात् वाष्कलशाखा-सम्मत संहितायाः संपूर्णो भवति। कुतश्चिदधिकाऽस्ति मन्त्राणां संख्याऽपि । शाकलशाखायां सप्तदशाधिकसहस्रसंख्यकानि सूक्तानि सन्ति। किञ्च वाष्कलशाखायां पञ्चविंशत्यधिकसहस्रसंख्यकानि सूक्तानि सन्ति। पूर्वोक्तेषु अष्टाधिकसूक्तेषु संज्ञानसूक्तमस्ति एकमेव। अयम् अस्याः संहितायाः अन्ते निवेशितो वर्तते। अन्यानि सप्तसूक्तानि बाल्यखिल्यसूक्तेभ्यः स्वीकृतानि भवन्ति। अतः तन्मण्डलस्थ समस्तसूक्तानां संख्या नवनवतिर्भवति ।

**'एतत् सहस्रं दश सप्त चैवाष्टवतो बाष्कलकेऽधिकानि ।**

**तान् पारेण शाकले शैशिरीये वदन्ति शिष्टानखिलेषु विप्रा ॥**

**आश्वलायनशाखा**

आश्वलायनसंहितायाः तथा तेषां ब्राह्मणानां कालः कस्मिंश्चित् समयेअवश्यमेव आसीत्। यतो हि कवीन्द्राचार्यस्य (१७ शताब्द्याः) सूच्यामेतेषां ग्रन्थानां नामोल्लेखः स्पष्टरूपेणोपलब्धो भवति। सम्प्रति अस्याः शाखायाः गृह्यसूत्रं श्रौतसूत्रमिति द्वौ समुपलब्धौ स्तः।

**शाङ्ख्यायनशाखा**

शाखायाः अस्याः संहिता तु नोपलभ्यते । किञ्च ब्राह्मणारण्यकौ ग्रन्थौ उपलभ्येते। अनेकेषां विचारकाणां मते शाङ्खायनस्तथा कौषीतकि शाखा एकैवाऽस्ति, किञ्च द्वेऽपि शाखे भिन्ने एव स्तः । शाङ्खायनीयसंहितायाः तथा शाकलशाखानुयायि-ऋक्संहितायाः अपि च मन्त्रसंहितयोः भेदो न दृश्यते, क्रमे एव विभिन्नता वर्त्तते केवलं मन्त्राणां ।

**माण्डूकायनशाखा**

अस्याः अपि शाखायाः ग्रन्थाः अनुपलब्धाः सन्ति। यत्र तत्र समुद्धरणादेव अस्यास्तित्वबोधोवर्तते ।

## <u>यजुर्वेदस्य विभागः</u>

## यजुर्वेदीयारण्यकम्

### तैत्तिरीयारण्यकम्

यजुर्वेदे एतस्मिन् आरण्यके दश परिच्छेदाः अथवा प्रपाठकाः वर्तन्ते। एषः प्रपाठकः सामान्यतः 'अरण' इति पदेन ज्ञायते। अस्य नामकरणम् अपि तेनैव कृतं विद्यते। यथा प्रथमस्य प्रपाठकस्य नाम भवति- 'भद्रः', द्वितीयस्य- 'सहैव', तृतीयस्य 'चितिः', चतुर्थस्य 'युञ्जते', पञ्चमस्य 'देव वै', षष्ठस्य 'परे', सप्तमस्य 'शिक्षा', अष्टमस्य- 'ब्रह्मविद्या', नवमस्य 'भृगुः', दशमस्य 'नारायणीयः' इति। अस्मिन् सप्तम-अष्टम-नवम प्रपाठकाः मिलित्वा 'तैत्तिरीयोपनिषदि 'ति कथ्यते। दशमप्रपाठकोऽपि महानारायणीयोपनिषदिति नाम्ना प्रसिद्धमस्ति। एषः प्रपाठकः आरण्यकस्य परिशिष्टभागः विद्यते। प्रपाठकानां विभागः अनुवाकेषु कृतमस्ति। नवमप्रपाठकं यावत् अनुवाकसंख्या १०७ भवति। तैत्तिरीयब्राह्मणसदृशम् अत्रापि प्रत्येकम् अनुवाके

दशवाक्यानाम् एकः अङ्कः वर्तते। प्रत्येकं दशकस्य अन्तिमं पदम् अनुवाकस्य अन्तिमे परिगणितम्भवति। अस्मिन् आरण्यके ऋङ्गन्त्राः समुद्धृताः।

प्रथमप्रपाठकः आरुण-केतुनामकस्य अग्ने उपासनायाः तथा तदर्थम् इष्टिकाचयनं वर्णयति। द्वितीये अस्मिन् प्रपाठके स्वाध्यायस्य तथा पञ्चमहायज्ञानां विषये वर्णनं कृतमस्ति। अत्र गङ्गा-यमुनयोः मध्यदेशः पवित्रः, तथा मुनीनां वासाय उत्कृष्टा भूमिः कथिता भवति। तृतीयप्रपाठकः चातुर्होत्रचितेः उपयोगिनां मन्त्राणां सङ्कलनं भवति। चतुर्थाध्याये प्रवर्त्यस्य उपयोगिनां मन्त्राणां विषये सङ्ग्रहः वर्तते। अत्र कुरुक्षेत्रस्य खाण्डवस्य च वर्णनं भौगोलिकस्थितेः अनुसारेण एवाऽस्ति। अस्मिन् प्रपाठके अभिचारमन्त्राणामपि सत्ता दृश्यते। आभिचारिकमन्त्राणां प्रयोगः शत्रूणां विनाशाय क्रियते। ४।२७ मन्त्रे तथा ४।३७ मन्त्रे 'छिन्धी भिन्धी हन्धी कट' एवंविधानां मन्त्राणां स्पष्टरूपेणात्र संकेतो दृश्यते। ४।३८ मन्त्रे अथर्ववेदस्य आभिचारिकमन्त्रं प्रति स्पष्टरूपेण सङ्केतः लभ्यते। पञ्चमे प्रपाठके यज्ञीयानां सङ्केतानाम् उपलब्धिः वर्तते। षष्ठे प्रपाठके पितृमेधसम्बन्धिनां मन्त्राणां विषये उल्लेखः प्राप्यते। सप्तम-अष्टम-नवमप्रपाठकेषु तैत्तिरीयोपनिषदस्ति। अस्मिन् दशमे प्रपाठके नारायणीयोपनिषदस्ति। अस्य प्रपाठकसंख्याऽपि निर्दिष्टा नास्ति।अस्मिन् आरण्यके विभिनेषु स्थानेषु कतिपयाः विशिष्टाः वार्ताः अपि दृश्यन्ते।

## **मैत्रायणीयारण्यकम्**

मैत्रायणीसंहिता कृष्णयजुर्वेदस्य अन्यतमा संहिता। इयं संहिता गद्य-पद्यात्मिकाऽस्ति । अस्यां संहितायां चत्वारः काण्डाः सन्ति । प्रथमकाण्डः (आदिमः) एकादशप्रपाठकेषु विभक्तोऽस्ति । येषु क्रमशः दर्शपूर्णमास-अध्वर-अाधान-पुनराधान-चातुर्मास्य-वाजपेयप्रभृतीनां यज्ञानां वर्णनमस्ति । द्वितीयः काण्डः (मध्यमः) त्रयोदशप्रपाठकेषु विभक्तः भवति। एतेषु प्रपाठकेषु काम्य-इष्टि-राजसूय-

अग्निचितिप्रभृतीनां यज्ञानां विस्तृतविवरणमस्ति । तृतीयकाण्डे (उपरि) षोडशप्रपाठकाः सन्ति । येषु अग्निचिति-अध्वरविधि-सौत्रामणी-अश्वमेधादीनां विस्तृतं वर्णनं वर्त्तते। चतुर्थकाण्डः खिलकाण्डनाम्ना विख्यातोऽस्ति । एतेषु प्रपाठकेषु पूर्वनिर्दिष्टराजसूयादीनां यज्ञानां विषये अावश्यकवस्तूनां सुमहानां सङ्ग्रहो वर्त्तते । समग्रसंहितायां २१४४ मन्त्राः सन्ति, येषु १७०१ ऋचः प्रतिकाण्डम् ऋग्वेदात् समुद्धृताः सन्ति । एते सर्वेऽपि मन्त्राः ऋग्वेदस्य विभिन्नमण्डलेषु समुपलब्धाः विद्यन्ते ।

## वाजसनेयि प्रातिशाख्यम्

मुनिना कात्यायनेन विरचितं **शुक्लयजुर्वेदस्य** प्रातिशाख्यं विद्यते । एषः कात्या यनोऽष्टाध्यायीवातिककाराद्भिन्नो वा - इत्यस्मिन् विपयेऽधुनापि मतवादः प्रचलति । अस्मिन विषये आचार्यपादानामस्मद्परमगुरूणां श्रीमतां बलदेवोपाध्यायानां सुस्पष्टमस्ति यत-इमे प्रातिशाख्यकर्तारः कात्यायना वातिकाराद्भिन्नाः सन्तीति नास्त्य सन्देहावसरः, इमे तु महर्षेः पाणिनेरपि प्राचीनतराः सन्ति।

अस्मिन् प्रातिशाख्ये अष्टावध्याया गुम्फिता: सन्ति । येषु परिभाषा-स्वर संस्काराणां त्रयाणां विषयाणां विस्तृत सर्वाङ्गीणं विवेचनमस्ति ।

तत्र प्रथमेऽध्याये-वर्णोत्पत्ति-अध्ययन विधि-संजापरिभाषा-वर्णानामुच्चारणस्था नादीनां वर्णनं विद्यते ।

द्वितीयेऽध्याये--स्वर-नियमा: ।

तृतीयेऽध्याये—सन्धेनियमाः ।

चतुर्थेऽध्याये-सन्धेः, पदपाठस्य क्रमपाठस्य चापेक्षिता नियमाः क्रमशः प्रति पादिताः सन्ति ।

पञ्चमेऽध्याये—अवग्रहनियमा: । समासे द्वयोः पदयोः पृथग् ग्रहणमवग्रह उच्यते, यो हि ह्रस्वस्य स्वरस्येवंकमात्रिको विद्यते ।

षष्ठाध्याये-आख्यातस्योपसर्गस्य च नियमाः ।

सप्तमेऽध्यायेपरिग्रहस्य नियमाः। परिग्रहस्यार्थो विद्यतेमध्ये इंति शब्द स्थापयित्वा पदस्य पुनरावर्तनम्।

अष्टमेऽध्याये-वर्णसमाम्नायस्य विस्तृत विवेचनम् । तत्र वर्णमाला-अध्ययन विधिः, वर्णानां देवता, पद-चतुष्टयन्तेपाञ्च गोत्र-देवतादीनां प्रख्यापनम् ।

## <u>तैत्तरीयप्रातिशाख्या</u>

तैत्तिरीयसंहितया सम्बद्धमिदं प्रातिशाख्यं प्रश्नद्वये खण्डद्वये विभक्तमस्ति । प्रत्येकस्मिन् प्रश्ने द्वादश अध्यायाः सन्ति । इत्थं सूत्रात्मकोऽयं ग्रन्थ चतुर्विंशत्यध्यायेषु विभक्तोऽस्ति । विषयाणां प्रतिपादनं सुव्यवस्थितं प्रामाणिकञ्च विद्यते।

तत्र प्रथमे प्रश्ने-वर्णसमाम्नायस्य, शब्दस्थानस्य शब्दोत्पत्तिप्रकारस्य, विविध स्वर-विसर्गसन्धीनां, मूर्द्धन्यविधानादिविषयाणां सुस्पष्टं विवेचनमस्ति ।

द्वितीये प्रश्ने, नकारस्य णत्वविधानस्य, अनुस्वारस्य-अनुनासिकस्य, अनु नासिकभेदस्य, स्वरितभेदस्य, संहिता-स्वरूपादेरनेकोपादेयविषयाणाञ्च प्रतिपादनमत्र विद्यते । स्वसंहितया सम्बद्धत्वात् सम्पूर्णान्युदाहरणानि तैत्तिरीयसंहितागतान्येव सन्ति ।

अस्य भूयस्यो व्याख्यासम्पदः सन्ति । प्रकाशितासु तिसृषु व्याख्यासु माहिषेयकृत 'पदक्रमसदन'नामकं भाष्यमतीव प्राचीनतमं विद्यते । यतो ह्यस्य द्वितीयेन व्याख्या कारेण 'सोमयार्य' इत्याख्येन स्वत्रिभाष्य रत्ने माहिषय-आत्रेय-वररुचीनां प्राचीनाना

व्याख्यानामुपयोगः कृतः । तासु व्याख्यासु–माहिषेयभाष्यमिदं सर्वप्रथमं स्थान धारयति । तस्मिन् निर्दिष्टानि समस्तान्युद्धरणानि अत्रोपलभ्यन्ते । 'पदक्रमसदन अन्वर्थकमिदं नाम । ... वेदविदां मतेन वैदिकपाठस्य द्वौ भेदौ भवतः, प्रथमः प्रकृतपाठः द्वितीयश्च विकृति पाठः । तत्र प्रथमे प्रकृतपाठे संहिता-पदक्रमपाठाश्च विद्यन्ते । तथा च शिखा-माला घनाद्यष्ट विकृतिपाठा विद्यन्ते । एषु प्रातिशाख्यानां प्रतिपाद्यो विषयः प्रकृतिपाठ स्तथा तत्सम्बद्धं स्वरसन्धिविवेचनं विद्यते । अनया दृष्टया माहिषेव भाष्यस्य 'पदक्रम सदन' इति नाम सार्थकमस्ति । भाष्यमिदं संक्षिप्तं लघुकायमुपादेयञ्चास्ति । सोम यार्यस्य 'त्रिभाष्यरत्नम'स्मादर्वाचीनमस्ति । गोपालयज्वाविरचितं वैदिकाभरणन्तु अनयोयोरपेक्षया रचनाकालदृष्टया नवीनमस्ति । एतास्तिस्र व्याख्याः प्रामाणिकाः प्रमेयबहुलाः, व्याकरणस्यान्तस्तत्त्वसमुद्घाटका नितरामुपयोगिन्यश्च विद्यन्ते ।

## **गृह्यसूत्राणि**

गृह्यसूत्रं कल्पस्य अङ्गम् भवति। अनेके ग्रन्थकर्त्तारः आश्वलायनगृह्मसूत्रं कारिकाबद्धं कृतवन्तः। तेषु लेखकेषु रघुनाथदीक्षितगोपालकुमारिलप्रभृतीनां विदुषां नाम विशेषरूपेण उल्लेखनीयमस्ति। अन्तिमलेखकेन आश्वलायनगृह्यसूत्रस्य नारायणवृत्तेस्तथाऽनन्तस्वामिनो निर्देशं कृतवान् स्वकीये ग्रन्थे। गृह्मसूत्रे च तदीये आश्वलायन शाङ्गायनं च वर्तेते। शुक्लयजुवेदस्य श्रौतसूत्रमेकमेव कात्यायनश्रौतसूत्रमस्ति । गृह्यसूत्रञ्च अस्यैकमेव पारस्करगृह्यसूत्रं विद्यते । कृष्णयजुर्वेदसम्बद्धानि श्रौतसूत्राणि-बौधायन-आपस्तम्बहिरण्यकेशि-वैखानस-भारद्वाज-मानवनामधेयानि सन्ति । एतस्मिन् वेदे बौधायनं गृह्यसूत्रमपि सुलभमस्ति । सामवेदीयकल्पसूत्रेषु अार्षेयं कल्पसूत्रं प्राचीनम् । एतत् लाट्यायनात् श्रौतसूत्रादपि प्राचीनतरमिति निगद्यते । वेदस्यास्य मुख्यं गृह्यसूत्रं कौथुमशास्त्रीयं गोभिलगृह्यसूत्रं

सुविदितम् । अथर्ववेदस्य श्रौतसूत्रं वैताननामकं एवं तदीयं गृह्यसूत्रं कौशिकसंज्ञकं वेद्यम् । गृह्यसूत्रमिदं प्राचीनभारतीययातुविद्याविषयकामनुपमाञ्च सामग्रीं प्रस्तौति ।

शाङ्खायनगृह्यसूत्रे षडध्यायाः सन्ति । विषयोऽपि तदेवास्ति - संस्काराणां वर्णनं, तथा तत्सम्बद्धानां गृहनिर्माण-गृहप्रवेशादीनां विषयाणां स्थाने स्थाने च वर्णनमस्ति । ऋग्वेदस्य तृतीया शाखा- 'कौषीतकि' इत्येतस्य कल्पसूत्राणामपि परिचयः सम्प्रति उपलभ्यते । धारणेयं प्रायः प्रचलिताऽस्ति यत्, शाह्वङ्गायन-कौषीतकि-उभयोरपि एकस्यैव शाखान्तर्गते भिन्न-भिन्नमभिधानमस्ति । एवं कौषीतकिशाखा शाङ्खायनशाखातः सर्वथा भिन्ना एवास्ति । कौषीतकिगृह्यसूत्रं सम्प्रति मद्रासनगरीतः प्रकाशितमभवत् ।

## शुक्लयजुर्वेदीयगृह्यसूत्राणि

पारस्करगृह्यसूत्रनाम्ना शुक्लयजुर्वेदस्य गृह्यसूत्रं विख्यातमस्ति । अस्य त्रिषु काण्डेषु प्रथमकाण्डे आवसथ्याग्नेराधानं, विवाहादारभ्यान्नप्राशनपर्यन्तानां विषयाणां वर्णनमस्ति । द्वितीयकाण्डे चूडाकरणादारभ्य उपनयन-समावर्तन-पञ्चमहायज्ञ-श्रवणाकर्म-सीतादियज्ञानां विवरणमस्ति । अन्तिमे काण्डे श्राद्धान्तरे अवकीर्णि-प्रायश्चित्तादीनां विविधानां विषयाणां प्रतिपादनमस्ति ।

## कृष्णयजुर्वेदीयगृह्यसूत्राणि

### बौधायनगृह्यसूत्रम्

गृह्यसूत्रमिदं बौधायनकल्पसूत्रस्यैको विशिष्टांशोऽस्ति । १९२० ख्रीष्टाब्दे गवर्नमेण्ट-ओरियन्टल-लाइबेरी-सीरीज-मैसूरनगरीतः प्रकाशितं बभूव । ग्रन्थोऽयं गृह्यशेष-पितृमेधसूत्रैः सह समन्वितोऽस्ति । अस्मिन् चत्वारः प्रश्नाः सन्ति ।

इतरहस्तलेखेष्वस्य दश प्रश्नाः (अध्यायाः) उपलब्धाः सन्ति । ग्रन्थेऽस्मिन् बहुविधस्य परिवर्तनस्य परिवर्धनस्य च सङ्केतो लभते।

**भारद्वाजगृह्यसूत्रम्**

भारद्वाजश्रौतसूत्रस्यैव एतत् अंशत्वेन तिष्ठति। सूत्रेऽस्मिन् त्रयोऽंशाः सन्ति। अस्य प्रकाशनं लाइडेन इत्यस्य डॉ. सालोमन्स-महोदयेन कृतम्। सम्पादकमहोदयेन अस्य परिवर्धनस्य विषये यदभिमतं प्रकाशितं तत्तु न स्वीकृतम्। विवाहप्रकरणे कतिचिद्विषयेषु आधुनिकतायाः सङ्केतो लभते । तेन ह्ययमंशः क्षेपक इति स्वीकर्तुं न शक्यते।

**आपस्तम्बगृह्यसूत्रम्**

आपस्तम्बकल्पसूत्रस्य सप्तविंशतितमः प्रश्नः इदमेव गृह्यसूत्रमस्ति । अस्मिन् गृह्मसूत्रे त्रिंशत् प्रश्नाः सन्ति । गृह्यसूत्रमिदं मन्त्रपाठस्य मन्त्राणां निर्देशं करोति । हरदत्तस्य अनाकुलावृत्तिस्तथा सुदर्शनाचार्यस्य तात्पर्यदर्शनव्याख्यया सह चौखम्बा-सीरीजकाशीतः ( १९२८ ई० ) प्रकाशितमस्ति। सूत्रमिदम् अष्टपटलेषु विभक्तमस्ति । प्रत्येकस्य पटलस्याभ्यन्तरे खण्डानि सन्ति । खण्डेषु सूत्राणां स्थितिरस्ति । फलतः समस्तो ग्रन्थः सूत्रेषु विभक्तोऽस्ति । अस्य गृह्यसूत्रस्यापि विषयस्तथैवास्ति यथाऽन्यगृह्मसूत्रेषूपलब्धो विद्यते । अस्य द्वौ व्याख्याकारिणौ वर्तेते । हरदत्ताचार्यः सुदर्शनाचार्यश्चेति । हरदत्ताचार्यस्य समयस्तु पञ्चदशशतकीयो वर्त्तते, कतिपयैरन्यप्रमाणैः विद्वानयं पञ्चदशशतकात् प्राचीनतरो वर्त्तते इति पुरातत्त्वविदो वदन्ति । हरदत्तोऽयं शैवमतानुयायी, कावेरीतटवासी दाक्षिणात्यो विद्वानासीत् । आपस्तम्बस्य गृह्यसूत्रं, गृह्यमन्त्रः, धर्मसूत्रं परिभाषाप्रभृतिग्रन्थानां व्याख्या एतेन विरचितेति । आश्वलायनगृह्यसूत्रस्य 'अनाविला'-टीका तथा गौतमसूत्रस्य 'मिताक्षरा'-व्याख्या अनेनैव हरदत्ताचार्येण लिखितेति ख्रीष्टस्य सप्तदशशतकस्य पूर्वाद्धे

रचितनिर्णयसिन्धौ कमलाकरभट्टेन नाम्ना निर्दिष्टोऽयं सुदर्शनाचार्यः अवर्द्राचीनोऽस्ति इति मन्यते।

**हिरण्यकेशिगृह्यसूत्रम्**

हिरण्यकेशिगृह्यसूत्रस्य अपरं नाम सत्याषाढगृह्यसूत्रमस्ति । हिरण्यकेशिकल्पसूत्रस्य १९ तथा २० प्रश्नरूपमस्ति । गृह्यानुष्ठानेषु आवश्यकमन्त्राः समग्ररूपेणात्र प्रदत्ताः सन्ति । एतेषु मन्त्रेषु प्रयुक्ताः शब्दाः पाणिनीयव्याकरणेन सुसङ्गताः न सन्ति। अस्य ग्रन्थस्योपरि मातृदत्तस्य प्रौढा व्याख्याऽस्ति। टीकया सह मूलग्रन्थस्य सम्पादनं डॉ० क्रिस्ते-महोदयेन वियनानगरीतः (१८८९ ई.) कृतं प्रकाशितञ्चेति । आङ्ग्लानुवादेन सह 'सेक्रेड बुक्स आफ द ईस्ट' ग्रन्थमालायाः मोल्डनवर्गेण सूत्रमिदं प्रकाशितमस्ति ।

**वैखानसगृह्यसूत्रम्**

तैत्तिरीयशाखातः सम्बद्धमिदं गृह्यसूत्रम् अवान्तरकालिकमिति मन्यते । एतत् सूत्रम् अनुष्ठानेषु योजनीयमन्त्राणां प्रतीकस्य एवोल्लेखं करोति । एतेषां मन्त्राणां स्वतन्त्रं सङ्कलनं 'वैखानसीया मन्त्रसंहिता' इति नाम्ना कृतमस्ति । गुह्यमन्त्रसंहितयोः पारस्परिकसम्बन्धविषये विद्वत्सु ऐक्यं नास्ति । कतिचिज्जनाः मन्त्रसंहितां गृह्यात् प्राचीनतरं मन्यन्ते, चान्येऽर्वाचीना समकालिका वेति मन्यन्ते । डॉ० कैलेण्डेन अस्य प्रकाशनमाङ्ग्लभाषानुवादेन सह कृतमिति ।

**अग्निवेशगृह्यसूत्रम्**

अस्य गृह्यसूत्रस्य रचयिता अग्निवेशनामको वैदिकाचार्योऽस्ति । अयमेवाचार्यः तैत्तिरीयाणां बाधूलशाखाऽन्तर्गते अग्निवेशोपशाखायाः प्रवर्त्तनं कृतवान् । अन्येभ्यः गृह्यसूत्रेभ्यः अस्य वर्ण्यविषयस्तथा रचनाकौशलं नितान्तं भिन्नं दृष्टिगोचरं विद्यते ।

अस्मिन् वर्णितानुष्ठानेषु नारायणबलि-यतिसंस्कार-संन्यासविधि-वानप्रस्थविधिप्रभूतीनामुपरि अवान्तरकालिकधार्मिकसम्प्रदायानां प्रभावः स्पष्टतः परिलक्षितो विद्यते । फलतः सामान्यगृह्यसूत्रेभ्यः अस्य दिशा भिन्ना एवेति । ग्रन्थोऽयं अनन्तशयन-संस्कृतग्रन्थमाला, त्रिवेन्द्रम-नगरीतः प्रकाशितोऽभवत् ।

**मानवगृह्यसूत्रम्**

अस्यापरं नाम मैत्रायणीयमानवगृह्यमपि भवति । मैत्रायणीयशाखायाः चरणव्यूहे निर्दिष्टाः भेदाः -मानव-वराह-दुन्दुभ-छागलेय-हारिद्रवेय-श्यामानीयानां 'मानवः' अन्यतमो विभेदः भवति । अस्मिन् गृह्यसूत्रे द्वौ पुरुषौ वा प्रकरणौ वर्तेते । प्रत्येकस्मिन् पुरुषे अनेकाः कण्डिकाः सन्ति । अस्मिन् ग्रन्थे विनायकपूजायाः विशेषवर्णनमस्ति । अष्टावक्रस्य भाष्येण साकं वडोदरा-नगरीतः प्रकाशितोऽयमस्ति । भाष्यकारः अस्य रचयितुर्नाम 'मानवाचार्य' इति वदति । एतस्य व्यक्तित्वविषये अल्पज्ञानमेवास्ति ।

**वाराहगृह्यसूत्रम्**

मैत्रायणीशाखायां गृह्यसूत्रमेतत् मैत्रायणीसंहितायाः मन्त्राणां प्रयोगं करोति। अस्य बहूनि सूत्राणि काठकगृह्यसूत्रमिव तथा मानवगृह्यसूत्रमिव सन्ति । गृह्योपयोगिनीनां विशिष्टवस्तूनामभावादेवायं ग्रन्थः तद्वन्महत्त्वपूर्णः नास्ति ।

**काठकगृह्मसूत्रम्**

काठकगृह्यसूत्रमपि मानवगृह्यसूत्रात् प्राप्यते । अस्यैव नामान्तरं'लौगाक्षिगृह्यसूत्रम्' भवति। अस्य ग्रन्थस्य द्वौ प्रकारकौ विभागौ वर्तेते। प्रथमविभागानुसारेण ग्रन्थेऽस्मिन् ७३ कण्डिकाः सन्ति। द्वितीयविभागानुसारेण अस्मिन्

भागे पञ्चाध्यायाः सन्ति। अनेनैव पञ्चाध्यायीविभागेनास्य लोकप्रियो नाम 'गृह्यपञ्चका' वर्त्तते । अस्य त्रिषु टीकाकारेषु आदित्यदर्शनः प्राचीनतमः भवति । माधवाचार्यस्य पुत्रो ब्राह्मणबलस्य व्याख्या टीका न भूत्वा अधिकांशतः पद्धतिरेवास्ति । हरिपालस्य पुत्रस्य देवपालस्य टीका भाष्यनाम्ना ख्याताऽस्ति । १९८१ विक्रमाब्दे त्रिभिः व्यख्याभिः संवलितं सुष्ठुसंस्करणं कैलेण्ड-महोदयेन लाहौरनगरीतः प्रकाशितम् ।

**शुक्लयजुर्वेदस्य शाखा**

शुक्लयजुर्वेदस्य माध्यन्दिनशाखा, काण्वशाखा चेति द्वे शाखे स्तः। प्रथमा उत्तरभारते प्राप्यते द्वितीया अपि च महाराष्ट्र। अनयोः शाखयोः संहिते भिन्ने सत्यौ अपि स्वल्पमेव भेदं ते धारयतः, बहुत्र अपि च साम्यम् अस्ति। किञ्च प्राचीनकाले काण्वशाखा उत्तरभारते एवासीत्। यतः अस्याः संहितायाः एकस्मिन् मन्त्रे (११/११) कुरु-पाञ्चालदेशीयनृपतेः निर्देशः प्राप्यते (एष वः कुरवो राजा, एष पाञ्चालो राजा)। महाभारतस्य आदिपर्वानुसारेण (६३/१८) शकुन्तलायाः पालनकर्तुः पितुः कुलपतिकण्वस्य आश्रमः मालिनीनद्याः तटे आसीत्। अद्यापि इदम् स्थानम् उत्तरप्रदेशस्य 'बिजनौर 'मण्डले 'मालन' नाम्ना ख्याता एका लघ्वी नदी अस्ति। अतः काण्वसंहितायाः प्राचीनसम्बन्धः उत्तरप्रदेशेन सह अङ्गीकरणे न कापि विप्रतिपत्तिः।

## कृष्णयजुर्वेदस्य शाखा

कृष्णयजुर्वेदस्य सम्प्रति चतस्रः शाखाः प्राप्यन्ते -

**तैत्तिरीयसंहिता**-

इयं प्रधानशाखा, अत्र सप्तखण्डाः सन्ति। ते अपि च खण्डाः अष्टकशब्देनकाण्डशब्देन अपि च व्यवह्रियन्ते। प्रतिकाण्डं कतिपयाध्यायाः वर्तन्ते ये प्रपाठकनाम्ना ख्याताः। इमेप्रपाठकाः बहुषु अनुवाक्षु विभक्ताः सन्ति।

### मैत्रायणीसंहिता

इमे द्वे अपि संहिते तैत्तिरीयसंहिताम् अनुकुरुतः।

### काठकसंहिता

केवलं क्रमे यत्र तत्र पार्थक्यं वर्तते।

### कापिष्ठलसंहिता

चरणव्यूहमतानुसारेण अस्याः विषये प्रतिपादयिष्यते।

## तैत्तिरीयसंहिता

तैत्तिरीयसंहितायाः प्रसारदेशः दक्षिणभारतेऽस्ति। आंशिकरूपेण महाराष्ट्रप्रदेशीयाः समग्ररूपेण अपि च अन्ध्रद्रविडदेशीयाः अस्याः शाखायाः अनुयायिनः सन्ति। अस्याः संहितायाः स्वकीयाः ब्राह्मण- आरण्यक-उपनिषत्-श्रौतसूत्र-गृह्यसूत्रप्रभृतयः अक्षुण्णाः सन्ति। तैत्तिरीयसंहितायाः परिमाणमपि न्यूनं नास्ति। आचार्यसायणस्य इयं स्वकीया शाखासीत्। शुक्लयजुर्वेदे वर्णितविषयाः इव अस्याः विषयाः सन्ति। पौरोडाश-याजमान वाजपेय-राजसूयप्रभृतिनानायागानुष्ठानानां विशदं वर्णनम् अत्राप्यस्ति। यज्ञस्य मुख्यस्वरूपस्य निष्पादकत्वेन अस्याः संहितायाः विद्वत्तापूर्णभाष्यं सर्वप्रथमम् आचार्यसायणेन रचितम्। किञ्च तस्मादपि पूर्वतरं भाष्यं भट्टभास्करमिश्रस्य (एकादशशताब्द्याः) समुपलब्धं वर्तते। ज्ञानयज्ञनाम्ना भाष्यमिदं विख्यातमस्ति। प्रामाणिकदृष्ट्या विद्वत्तादृष्ट्या वा कस्मादपि भाष्याद् हीनतरमिदं भाष्यं नास्ति। अधियज्ञार्थाद् अतिरिक्तः आध्यात्मिकाधिदैविकपक्षयोरपि मन्त्राणामर्थो यत्र तत्र कृतोऽस्ति।

## मैत्रायणीसंहिता

कृष्णयजुर्वेदस्य अन्यतमा शाखा मैत्रायणी। इयं अपि च संहिता गद्यपद्यात्मिकाऽस्ति । अस्यां संहितायां चत्वारः काण्डाः सन्ति। प्रथमकाण्डः एकादशप्रपाठकेषु विभक्तोऽस्ति । येषु क्रमशः दर्शपूर्णमास-अध्वर-आधान-पुनराधान-चातुर्मास्य वाजपेयप्रभृतीनां यज्ञानां वर्णनमस्ति। द्वितीयः काण्डः त्रयोदशप्रपाठकेषु विभक्तः अस्ति। एतेषु प्रपाठकेषु काम्य-इष्टि-राजसूय-अग्निचितिप्रभृतीनां विस्तृतं विवरणमस्ति। तृतीयकाण्डे षोडशप्रपाठकाः सन्ति। येषु अग्निचिति-अध्वरविधि-सौत्रामणी-अश्वमेधादीनां विस्तृतं वर्णनमस्ति। चतुर्थकाण्डः खिलकाण्डनाम्ना विख्यातोऽस्ति। एतेषु पूर्वनिर्दिष्टराजसूयादियज्ञानां विषये आवश्यकवस्तूनां सुमहान् सङ्ग्रहो वर्तते। समग्रसंहितायां २१४४ मन्त्राः सन्ति, येषु १७०१ ऋचः प्रतिकाण्डम् ऋग्वेदात् समुद्धृताः सन्ति। एते सर्वेऽपि मन्त्राः ऋग्वेदस्य विभिन्नमण्डलेषु समुपलब्धाः भवन्ति ।

## कठसंहिता

यजुर्वेदस्य सप्तविंशतिशाखासु कठशाखा अन्यतमा। पुराणेषु काठकजनाः मध्यप्रदेशीयनाम्ना माध्यमनाम्ना वा विख्याताः आसन्। अनेन ज्ञायते यत् ते प्राचीनकाले मध्यप्रदेशे वसन्ति स्म। पतञ्जलेः कथानुसारं कठसंहितायाः प्रसारः तथा पठन-पाठनं प्रतिग्रामम् आसीत् ('ग्रामे ग्रामे काठकं कालापकं अपि च प्रोच्यते'-महाभाष्यम् ४/३/१०१)। अनेन अस्याः संहितायाः प्राचीनकाले विपुलप्रचारस्य बोधो वर्तते। अधुना अस्याः अध्येतृतॄणां संख्या अतीव अल्पा।कठसंहितायां पञ्च खण्डाः सन्ति। ते अपि च क्रमशः इठिमिका-माध्यमिका-ओरमिका- याज्यानुवाक्या-अश्वमेधाद्यनुवचननामभिः ख्याताः सन्ति। एतेषां खण्डानाम् अंशस्य नाम स्थानकमस्ति । एतानि नामानि वैदिकसाहित्येऽन्यत्र दुर्लभानि सन्ति। अस्यां संहितायां स्थानकस्यसंख्या चत्वारिंशत्, अनुवचनानां संख्या त्रयोदश, अनुवाकानां संख्या

त्रयश्चत्वारिंशदधिकाष्टशतम्, मन्त्राणां संख्या एकनवत्यधिकत्रिसहस्रम्, मन्त्रब्राह्मणयोः सम्मिलिता संख्या अष्टादशसहस्रपरिमिता।

## कापिष्ठलसंहिता

चरणव्यूहस्य मतानुसारेण चरकशाखान्तर्गते कठानां, प्राच्यकठानां कपिष्ठलकठानाञ्च उल्लेखः प्राप्यते, येन उल्लेखेन शाखासम्बद्धस्य अस्य पूर्णपरिचयो वर्तते। कपिष्ठलः कस्यचित् ऋषिविशेषस्य नाम आसीत्। अस्य उल्लेखम् महावैयाकरणपाणिनिमहर्षिः 'कपिष्ठलो गोत्रे' (८/३/९१) इत्येतस्मिन् सूत्रे कृतवान्। भाष्यकारेण दुर्गाचार्येणापि स्वात्मानं 'कपिष्ठलो वाशिष्ठः' इति उक्तम् ("अहञ्च कापिष्ठलो वाशिष्ठः" निरुक्तटीका ४/४)। प्रायः कस्यचित् स्थानविशेषस्य इदम् अभिधानम् आसीत्। अस्याः संहितायाः सम्पादकेन अनुमीयते यत्- कपिष्ठलग्रामस्य प्रतिनिधिः 'कैथल' इत्याख्यो ग्राम एवासीत्। ग्रामोऽयं कुरुक्षेत्रे सरस्वतीनद्याः पूर्वस्यां दिशि अवस्थितः आसीत्। अस्य ग्रामस्योल्लेखः काशिकायां तथा वराहमिहिरेण रचितायाम् बृहत्संहितायां (१४/४) प्राप्यते।

काठकसंहितातः अनेकविधं वैभिन्यं पार्थक्यञ्च अस्यां कापिष्ठलसंहितायां परिलक्ष्यते। काठकसंहितावत् मूलग्रन्थस्य समानत्वेऽपि अस्याः स्वराङ्कनपद्धतिः ऋग्वेदसदृशी। ऋग्वेद इव ग्रन्थोऽयम् अष्टकेषु अध्यायेषु अपि च विभक्तोऽस्ति । एवम् कापिष्ठलसंहितायाम् ऋग्वेदस्यैव महान् प्रभावः परिलक्ष्यते। ग्रन्थोऽयम् अपूर्णः एवास्ति। ग्रन्थेऽस्मिन् निम्नलिखितानि अष्टकानि तथा तदन्तर्गता अध्यायाश्च सन्ति

## बोधप्रश्नाः

- शुक्लयजुर्वेदस्य कति शाखाः।
- कृष्णयजुर्वेदस्य कति शाखाः प्राप्यन्ते।

- माध्यन्दिनशाखा कुत्र लभ्यते।
- काण्वशाखा कुत्र प्राप्यते।
- मैत्रायणीसंहितायां कति काण्डाः सन्ति।

**सामवेदः, अथर्ववेदः- खण्डः-2**

(मन्त्राः- आरण्यकम्- प्रातिशाख्यम्- गृह्यसूत्रम्- शाखाः)

# प्रस्तावना

सामवेद इत्यत्र गीतिरूपा मन्त्राः विद्यन्ते। अत एव सः उपासनाकाण्डपरो वेदः इति गीयते। यज्ञे चत्वारो ऋत्विजो सन्ति होता, अध्वर्युः, उद्गाता, ब्रह्मा, होता-आह्वानकर्त्ता, स हि यज्ञावसरे प्रकान्तदेवतानां प्रशंसाय रचितान् मन्त्रान् उच्चरयन् देवताः आह्वयति, तत्कार्याय सङ्कलिता मन्त्राः स्तुतिरूपतया ऋचः समाख्याताः, तेषां संग्रह एव ऋग्वेदः। अध्वर्युर्विधिवद्यज्ञं सम्पादयति, तत्रावश्यकमन्त्रा यजूंषि, तत्संग्रहो यजुर्वेदः उद्गाता उच्चस्वरेण गानकर्त्ता, स हि स्वरबद्धान् मन्त्रान् उच्चैर्गायति, तदपेक्षितमन्त्रसंग्रहः सामवेदः। ब्रह्मा यज्ञनिरीक्षकः कृताकृत्वेक्षणकर्मा, स हि सर्वविधमन्त्रज्ञः तदपेक्षितो मन्त्रराशिरथर्ववेद इति उच्यते।

# <u>उद्देश्यानि</u>

- सामवेदस्य आरण्यकाणि कानि इति ज्ञानं जायते।
- अथर्ववेदस्य आरण्यकाणि कानि इति ज्ञानं जायते।
- सामवेदस्य प्रातिशाख्यानि कानि इति ज्ञानं जायते।
- अथर्ववेदस्य प्रातिशाख्यानि कानि इति ज्ञानं जायते।
- गृह्यसूत्रविषये ज्ञानं प्रभविष्यति।

## सामवेदस्य विभागः

### सामवेदीयारण्यकम्

**सामवेदेन** सहसम्बद्धम्आरण्यकं**तवलकारारण्यकमिति**नाम्नाज्ञायते। एतदेवआरण्यकं 'जैमिनीयोपनिषद्ब्राह्मणमितिउच्यते। अस्यचत्वारोऽध्यायाःसन्ति। प्रत्येकस्मिन्अध्यायेअनुवाकाःभवन्ति।
चतुर्थाध्यायस्यदशमानुवाकेप्रसिद्धःतवलकारःकिंवाकेनोपनिषदस्ति।
अथर्ववेदस्यआरण्यकम्नोपलभ्यते। एतेन वेदेन सहसम्बद्धाःयाउपनिषदःवर्तन्ते, ताःकस्यापिआरण्यकस्य भागो न भूत्वाआरम्भादेवस्वतन्त्रग्रन्थरूपेणविद्यमानाःसन्ति।

## सामवेदप्रातिशाख्यम्

विद्वांसः समीक्षकाः कथयन्ति यत्-सामवेदस्यानेकानि प्रातिशाख्यानि प्रकाशि तानि सन्ति , तेष्वेतानि मुख्यानि सन्ति ।

### पुष्पसूत्रम्

ऋषिणा पुष्पेण प्रणीतत्वादिदं प्रातिशाख्यं पुष्पसूत्रमिति नाम्नाऽभिधीयते । अस्मिन् दश प्रपाठकाः सन्ति । अस्योपरि उपाध्यायस्याजातशत्रोः कतं भाष्यं प्रकाशितमस्ति । प्रस्तुतमिदं प्रातिशाख्यं गानसंहितया सम्बन्धितमस्त्यत एवास्मिन् स्तोमस्य बहुलांशेन विवेचनमस्ति । अपि च तादृशानां स्थलविशेषाणां मन्त्राणाञ्चोल्लेखाः सन्ति, येषु स्तोभानां विधानमपवादो अस्ति । सङ्गीतोपयोगि सामग्रीणां सङ्कलनेन सू त्रमिदं नितरामुपयोगितां विति । अस्मिश्च मुख्य रूपेण वेय गाने अरण्ये गेयगाने च प्रयुक्तानां साम्नामूहहन मन्त्रेषु कथं केन वा रूपेण भवती त्यस्य विशदं विवेचनमस्ति ।

हरदत्तरभिताया: सामवेदीयसर्वानुक्रमण्या: आधारमाधृत्य पुष्पसूत्रस्य फुल्ल सूत्रस्य वा रचयिता सूत्रकारो वररुचिः । अस्य पुष्पसूत्रस्योपरि उपाध्यायस्याजात शत्रो मकस्य कस्यापि ग्रन्थकारस्य व्याख्या उपलभ्यते ।

## ऋक्तन्त्रम्

पुस्तकमिदं सामवेदस्य कौथुमशाखायाः प्रातिशाख्यमस्ति । अस्मिश्चान्यप्रातिशाख्येषु वर्ण्यविषयैस्सह एषां विषयाणामपि अतिशयेन साम्य मस्ति । ग्रन्थस्य पुष्पिकायामिदं 'ऋक्तन्त्रव्याकरणम्' इति नाम्ना निर्दिष्टमस्ति । अशीत्युत्तरद्विशतसूत्रेषु पञ्चप्रपाठकेष्वध्यायेषु वा विभक्तमिदं ऋक्तन्त्रम्। अस्य रचयितारः सन्ति सुप्रसिद्धा वैयाकरणाः शाकटायननामधेयाः । येषां निर्देशा यास्कस्य पाणिनेश्च ग्रन्थेषुपलभ्यते । अक्षरोदयज्ञानवैशिष्टयमत्र वणितमस्ति । तत्पश्चाच्च व्याकरणस्य विशिष्टानां पारिभाषिकशब्दानां लक्षण निर्देशः प्राप्यते । वर्णाक्षराणामुच्चारणस्थाननिरूपणानन्तरं सन्धेविवरणं वैशद्येन प्रतिपादितमस्ति । पदान्ताक्षराणां विविधपरिवर्तनानां निरूपणं सन्धेः प्रसङ्गे महत्त्वाधायकम्पादेय ञ्चास्ति । तदुदाहरणञ्च यथा—अन्तिमनकारस्य विसर्जनीये परिवर्तनं यथा--ऋतून + अनु = ऋतुरनु, रेफविशिष्टशब्दानां विसर्गस्य रेफे परिवर्तनम् —प्रातरग्नि, प्रातर्जुपस्व इत्यादौ । इत्थमत्र व्याकरणस्य गूढतथ्यानां विवेचनमुपलभ्यते ।

अतो निश्चीयते यदिदं प्रातिशाख्यं स्वमूलस्वरूपे पाणिनेः पूर्वमासीदिति । तस्मात् परिभाषाविधाने सूत्राणां रचनायाञ्च यद्यष्टाध्याय्यामेतस्य विपुल: प्रभावो दृश्यते तदा नात्राश्चर्यस्य किमपि कारणमवशिष्टमस्ति । यास्केनापि एतस्य विशिष्टमतानां निर्देशो विहितः स्वमहनीये ग्रन्थे ।

ऋक्तन्त्रव्याकरणस्य रचयितुर्विषये मतद्वयं विद्वन्मण्डले विराजते। तत्र प्रथमे पक्षे शाकटायनः, द्वितीये पक्षे च 'औद् व्रजिः' । अत्र विदुषां सम्मतं मतमस्ति यदेको

व्यक्तिगतनाम्ना द्वितीयश्च गोत्रजनाम्नेति समन्वयः । अन्यच्च-गोभिल गृह्यसूत्रस्य व्याख्यातुर्भट्टनारायणस्य 'राणायनीयानाम् ऋक्तन्त्रप्रसिद्धा विसर्जनी यस्याभिनिष्ठानाख्या' इति कथनानुसारेण ऋक्तन्त्रस्य सम्बन्धो राणायनीयशाखया सह स्वीक्रियते । कथनस्याभिप्रायोऽयमत्र राणायनीयशाखान्विताया सामसंहिताया मूला धारं स्वीकृत्य ग्रन्थोऽयं विनिर्मित इति। अस्यैव सक्षेपीकरणं कृत्वा केनाप्याचार्येण **लघु ऋक्तन्त्रम्** इति नाम्ना विरच्य प्रख्यायितम् ।

# सामवेदीय-गृह्यसूत्राणि

## गोभिलगृह्मसूत्रम्

अस्य प्रकाशनमनेकेभ्यः स्थानेभ्योऽभवत् (क्नाउएर १८८५-८६; विब्लि० ई० १८७१-७९; सत्यव्रतसामश्रमी १९०६) अन्यैः विषयैः सह पिण्डपितृयज्ञस्य वर्णनं करोतीदं सूत्रम् । गोभिलगृह्यसूत्रस्य आङ्ग्लानुवादः 'सेक्रेड बुक अाफ ईस्ट' इत्याख्यसंस्थातः ओल्डेनवर्ग-महोदयेन कृतः ।

**खादिरगृह्यसूत्र**स्य आङ्ग्लानुवादः २९७ खण्डे प्रकाशितोऽभवत् । गृह्यसूत्रमिदं रुद्रस्कन्दस्य टीकया सह प्रकाशितमस्ति मैसूरनगरादिति । १९२२ ख्रीष्टाब्दे डॉ० कैलेण्ड-महोदयेन लाहौरनगरात् **जैमिनीयगृह्यसूत्रं** प्रकाशितम् । त्रिषु प्रमुखसामवेदीयसूत्रेषु गोभिलगृह्यसूत्रम् अतिप्रख्यातमस्ति । बहुप्रचलितात् कौथुमशाखातः सम्बद्धमिदं सूत्रमतीव लोकप्रियमप्यस्ति । इदं मन्त्रब्राह्मण-नामकात् सामवेदीयमन्त्रसङ्ग्रहात्मकग्रन्थाद् अनुष्ठानावसरे मन्त्राणामुद्धरणं ददाति, किञ्च प्रतीकरूपेणैव सामसंहितायां मन्त्रोऽप्युद्धृतोऽस्ति ।

## खादिरगृह्यसूत्रम्

सामवेदस्य राणायणीयशाखातः सम्बद्धेदं गृह्मगोभिलसूत्रस्योपरि सर्वात्मनाऽऽधारितमस्ति । तस्यादेशो नियमश्च अत्र संक्षिप्तरूपेण प्रस्तुतोऽस्ति । फलतः सूत्रमिदं गोभिलगृह्यसूत्रस्यैव संक्षिप्तसंस्करणमस्ति ।

**जैमिनीयगृह्यसूत्रम्**

खण्डद्वयेषु विभक्तमिदं सूत्रमस्ति । प्रथमखण्डे चतुर्विंशतिः कण्डिकाः सन्ति, द्वितीयखण्डे नव कण्डिकाश्चेति । अस्य सुबोधिनी-टीका श्रीनिवासाध्वरीमहोदयेन कृता। अस्याः टीकायाः कतिपयानि महत्त्वपूर्णोद्धरणानि मूलग्रन्थेन सह कैलेण्डेन प्रकाशितानि सन्ति ।

## बोधप्रश्नाः

- गोभिलगृह्यसूत्रं केन वेदेन सम्बन्धितः अस्ति?
- जैमिनीयगृह्यसूत्रं कति खण्डेषु विभक्तमस्ति?
- जैमिनीयगृह्यसूत्रस्य प्रथमखण्डे कति कण्डिकाः सन्ति?

## अथर्ववेदस्य विभागः

अथर्ववेदः अभिचारक्रियायाः प्राधान्येन प्रतिपादकः अयं वेदः अथर्वनामकर्षिणा दृष्टः। वेदेष्वथर्ववेदः अयमेकया भूयस्या विशिष्टतया सह संवलितोऽस्ति। ऋग्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति। यदा हि ऋग्वेदादयस्त्रयो वेदा आमुष्मिकं फलं प्रददति, तदाऽयं अथर्ववेद ऐहिकमपि फलं प्रयच्छति। जीवनं सुखसमन्वितं कर्तुं येषां

साधनानामपेक्षा भवति, तेषां सिद्ध्यर्थमम् इह वेदे विविधानामनुष्ठानानां विधानं विहितमस्ति। पतञ्जलिना यद्यप्यस्य वेदस्य नवशाखाः समुल्लिखताः, परमीदानीन्तु पैप्पलाद-शौनकसंज्ञके द्वे एव शाखे लभ्येते। प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता पैप्पलादशाखासंहिताऽपि च अनतिचिरेणैव मुद्रिते स्तः।

अथर्ववेदे विंशतिकाण्डानि काण्डानि, एकत्रिंशदधिकसप्तशतकानि सूक्तानि, सप्ताशीत्यधिकोनत्रिंशत्शतमन्त्राः विद्यन्ते। तेषु मन्त्रेषु द्वादशशतमन्त्राः ऋग्वेदेऽपि दृश्यन्ते। विंशतिकाण्डे १५३ सूक्तानि सन्ति, तेषु द्वादशसूक्तानि अतिरिच्य शेषाणि सर्वाण्यपि ऋग्वेदस्य दशममण्डले समुपलभ्यन्ते। भूर्जपत्रेषु शारदालिप्या लिखितस्य अथर्ववेदस्य पुरातनं पुस्तकं काश्मीरीयैः सम्पादितम् अस्ति। तद् अधुना ट्यूबिञ्जन् सर्वकलाशालायाः ग्रन्थसङ्ग्रहे अस्ति।

## **अथर्ववेदीयप्रातिशाख्यम्**

वैदिकवाङ्मयेऽथर्ववेदस्य प्रातिशाख्यद्वयं प्रख्यातमस्ति । तत्र प्रथमत्वेन चचिती शौनकीया चतुरध्यायिकाऽस्ति । पाश्चात्यविदुषा डॉ० ह्विटनीमहाशयेनेयं शौनकीया सानुवादा प्रकाशिता। चतुर्वध्यायेष विभक्तमिदं प्रातिशाख्यम् । ह्विटनीप्रकाशि ग्रन्थे शौनकस्य नामनिर्देशात् तन्नाम्नैव नामकरणमभूत् । सत्यन्त्विदमस्ति यत् नामलेखकयोर्मध्ये महदन्तरं भवति ।।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये---सरस्वतीभवने सुरक्षिते हस्तलेखे कौत्सव्याकरणमिति नाम्ना विज्ञापितमिदं प्रातिशाख्यग्रन्थलेखकेन । तत्र पुष्पिकायां भवति'इत्यथर्ववेदे कौत्सव्याकरणे चतुरध्यायिकायां ... 'पाद इति'। कोऽयं कौत्सः, महाभाष्यचचितः पाणिनेः शिष्यः उत अन्य: ? किं द्वावप्यभिन्नावेवसमीक्षणमपेक्षते एष विषयः ।

अथर्ववेदप्रातिशाख्येप्रातिशाख्यविषयका केचन एव विषयाः समाख्याताः सन्ति । सन्धेः, स्वरस्य पदपाठस्य च नियमा अत्र प्रदर्शिताः सन्ति । येषु स्वरवर्णन मधिकेन विस्तरेणास्ति । प्रातिशाख्यमिदं पारिभाषिकशब्दानां तथा प्रयोगो न करोति यथाऽन्यप्रातिशाख्येषु नियमत उपलब्धा भवन्ति । शाकल्याचार्य परित्यज्य न केषामप्यन्येषामाचार्याणामुल्लेखोऽत्र मिलति । उभावपि ग्रन्थौ पारस्परिकसहयोगे नाथर्ववेदस्य समग्रान् विषयान् निरूपयतः स्फुटीकुरुतः ।

## अथर्ववेदस्य शाखाः

पस्पशाह्निके **'नवधाऽऽथर्वणो वेदः'**इति लिखित्वा पतञ्जलिना अथर्ववेदस्य नवशाखाः कथिताः। पुराणानुसारेण वेदव्यासः यं शिष्यम् अथर्वस्य अध्यापनम् अकारयत्, तस्य नाम सुमन्तुः इति आसीत्।भागवतेऽस्य चर्चाऽस्ति – सुमन्तुः अभिचारप्रधानवेदस्य मुख्यप्रचारकः आसीत्। तेन असौ 'दारुणमुनिः' इत्युपाधिना विभूषितः आसीत्। अथर्ववेदस्य शाखानां विस्तारः पुराणेषु वर्णितः अस्ति। किञ्च भागवते कबन्धस्य नाम निर्दिष्टं नास्ति।अस्मिन् पुराणे सुमन्तोः द्वौ शिष्यौ कथितौ पथ्यो वेददर्शश्चेति। विष्णुपुराणेऽपि शिष्यद्वयस्य चर्चाऽस्ति। किन्तु वेददर्शस्य स्थाने 'देवदर्श' इति नाम अस्ति। अथर्वणमहानारायणोपनिषद् स्वात्मानं देवदर्शी नाम्नाऽथर्वशाखया सह सम्बद्धं स्वीकरोति। अतः 'देवदर्शः' किंवा 'देवदर्शी' इति नाम अधिकं स्वीक्रियते। विष्णपुराणानुसारेण पथ्यस्य त्रयाणां शिष्याणां नाम क्रमशः जाबालिः, कुमुदादिः, शौनकः चासीत्। वेददर्शस्य चत्वारः शिष्या आसन्। ते च मोदः, ब्रह्मावलिः, पिप्पलादः, शौष्कायणिः, अथवा शौक्लायनिः। एतेषु शौनकस्य शिष्यः बभ्रूस्तथा सैन्धवायनः कथितः। एभिः मुनिभिः अथर्ववेदस्य विशेषप्रचारः सम्पन्नोऽभवत्। प्रपञ्चहृदय-चरणव्यूह-सायणभाष्यादीनाम् उपोद्घातेषु यद्यपि शाखानां सङ्ख्या अभिन्ना, तथापि एतेषु नामसु महती भिन्नता दग्गोचरीभवति। निम्नलिखितान्यभिधानानि सन्ति - (१)

पियलाद, ( २ ) स्तौदः, ( ३ ) मोदः, (४) शौनकीयः, (५) जाजलः, ( ६ ) जलदः, ( ७ ) ब्रह्मविदः, (८) देवदर्शः, ( ९ ) चारणवैद्यश्च। आसु अथर्ववेदस्य नवशाखासु सम्प्रति शौनकपिप्पलादसमाख्ये द्वे एव शाखे प्राप्येते।

**पिप्पलादः**

पिप्पलाद-मुनिरेको अध्यात्मवेत्ता अस्ति। स्वाध्यात्मविषयकसंशयनिवारणाभिप्रायेण सुकेशाभरद्वाजादिषड् मुनीनां तस्य पार्श्वे आगमनस्योल्लेखो लभते। तेन दत्तान्युत्तराण्यपि प्रश्नोपनिषदि सुरक्षितानि च सन्ति। पुरा अस्य संहितायाः विशिष्टः ख्यातिरासीत्। अस्य द्वौ ग्रन्थौ आस्ताम्। प्रपञ्चहृदयस्य कथनमस्ति यत् — पिप्पलादशाखायाः मन्त्रसंहिता विंशतिः काण्डेषु विभक्ताः सन्ति, तथा तस्याः ब्राह्मणे अष्टाऽध्यायाः सन्ति। पिप्पलादसंहितायाः एका प्रतिः शारदालिप्यां कश्मीरे उपलब्धाऽभवत्। सा हस्तप्रतं कश्मीरनृपतिना जर्मनविद्वांषे राथ-महोदयाय उपहारत्वेन प्रेषिताऽभवत्। एकोऽधिकोनविंशतितमे ख्रीष्टाब्दे तस्याः आलोकलेख्यं अमेरिकातः प्रकाशितोऽभवत्। महाभाष्यानुसारेण- '**शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरमिस्रवन्तु नः**' अथर्ववेदस्य प्रथमोऽयं मन्त्रोऽस्ति, किञ्च सम्प्रतिप्रचलितायां शौनकसंहितायां षष्ठसूक्तस्य अयं प्रथमो मन्त्रोऽस्ति। गुणविष्णुना ज्ञातो भवति यदयं मन्त्रः पिप्पलादशाखायाः आदिमो मन्त्रः आसीत् इति।अनेनैव ज्ञातो भवति यद्, महाभाष्यकाले अस्याः संहितायाः विशेषख्यातिरासीत्।

**मौदः** महाभाष्ये, शाबरभाष्यस्य अस्य मौदमुनेः उल्लेखो लभते। मौद-शाखा-विशेषज्ञः किंवा जलदशाखाविशेषज्ञः पुरोहितः यस्मिन् राष्ट्रे वसति, तद्धि राष्ट्रं नश्यति -

**पुरोधा जलदो यस्य मौदो वा स्यात् कदाचन। अब्दाद् दशभ्यो मासेभ्यो राष्ट्रभ्रष्टं भविष्यति।।**

अनेनास्याः शाखायाः अल्पप्रचलनस्य बोधो भवति।

**शौनकः**

सम्प्रति प्रचलिताऽथर्वसंहिता गोपथब्राह्मणश्चास्यैव शाखायाः वर्तते। तौद-जाजल-ब्रह्मवद-देवदर्शादयः तु नाममात्रणैव ख्याताः सन्ति। अथर्वस्य अन्तिमा शाखा चारणवैद्यानां विषये कौशिकसूत्रस्य व्याख्यातःइति अथर्वपरिशिष्टादेवज्ञातो भवति। वायुपुराणाद् ज्ञातो भवति यदस्यां शाखायां षड्विंशत्यधिकषड्विंशतिमन्त्राः आसन्, किञ्चाधुना इयं संहिता समुपलब्धा नास्ति।

**बोधप्रश्नाः**

- अथर्ववेदे कति काण्डानि सन्ति
- पिप्पलादः केन वेदेन सह सम्बन्धः अस्ति
- शौनकशाखायां कति मन्त्राः सन्ति

||श्रीः||

**उपनिषदः-खण्डः-3**

(ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-एतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यकोपनिषदः)

## प्रस्तावना

प्रस्थीयते अनेनेति प्रस्थानम्। प्रत्येकं दर्शनं कस्मिंश्चित् केषुचिद् वा प्रतिष्ठितं भवति। वेदान्तदर्शनमपि येषु प्रतिष्ठितं तानि प्रत्येकं प्रस्थानमिति शब्देन अभिधीयन्ते। तानि अपि श्रुतिः, स्मृतिः, न्यायः चेति। तथा अपि समेषां प्रस्थानत्रयमिति संज्ञा। एतान्येव वेदान्तदर्शनस्य भित्तिभूतानि ।

श्रुतिः खलु वेदान्तस्य उत्तरमीमांसायाः वा आदिः। किन्तु उपनिषदुक्तविषयाणां बोधः सारल्येन न भवति। तज्जातानाम् अर्थानां ज्ञाने भ्रान्ताः स्युर्लोका इति निश्चित्य तत्सारोन्मोचनाय शास्त्रस्य अपि रक्षणाय ग्रन्थान्तराणि विरचितानि। तेषु महाभारते भीष्मपर्वणि उदीरिता श्रीमद्भगवद्गीता तथा महर्षिबादरायणप्रणीतं वेदान्तसूत्रं प्रामुख्येन प्रमाणभूतम्। एवं श्रुतिप्रस्थानत्वेन ईशाद्यः उपनिषदः, स्मृतिप्रस्थानत्वेन श्रीमद्भगवद्गीता, न्यायप्रस्थानत्वेन वेदान्तसूत्रं शारीरिकसूत्रं वा स्वीकृतं विपश्चितैः।

एतानि सर्वाणि वेदान्तशास्त्रे प्रमाणानि। किन्तु तत्र श्रुतिः परमप्रमाणभूता, ततः स्मृतिः, ततः न्यायश्च प्रमाणभूतः। यदि क्वचिद् एतेषां परस्परविरोधः विद्यते तदा श्रुतेरेव प्रमाणत्वम्।

अत्र एवं बोद्धव्यं यत् न केवलं स्मृतौ गीता एव। किन्तु वेदान्तप्रतिपाद्यतत्त्वानि पुराणादिषु यत्र यत्र उपलभ्यन्ते तानि सर्वाणि एव स्मृतिरूपप्रमाणाणि। एवमेव उपनिषदामेव न केवलं श्रुतित्वेन ग्रहणम्। अपि अपि समग्रे वेदे यत्र यत्र

वेदान्तप्रतिपादकवाक्यानि सन्ति तत्सर्वाणि श्रुतिप्रमाणत्वेन स्वीकृतानि इति वेदान्तपरम्परा। किन्तु न्यायप्रस्थानत्वेन शारीरिकसूत्रमेव स्वीक्रियते।

## उद्देश्यानि

अस्य पाठस्य अध्ययनेन -

⇒ प्रस्थानविषये ज्ञानं भवेत्।

⇒ श्रुतिः का इति जानीयात्।

⇒ उपनिषच्छब्दार्थं जानीयात्।

⇒ उपनिषदां प्राप्तिः कुत्र भवतीति जानीयात्।

⇒ उपनिषदा वेदान्तशब्दस्य कः सम्बन्ध इति जानीयात्।

⇒ उपनिषदां समासेन परिचयं प्राप्नुयात्।

श्रुतिर्हि वेदः। वेदस्य पर्यायशब्देषु श्रुतिरिति अन्यतमः। श्रूयते अनया इति व्युत्पत्तिः। तेन श्रवणार्थकश्रुधातोः क्तिन्प्रत्यये श्रुतिः इति पदमुपलभ्यते। वेदः द्विधा विभज्यते कर्मकाण्डात्मकः ज्ञानकाण्डात्मकः चेति। ज्ञानकाण्डमेव उत्तरमीमांसाया विषयः। कर्म तु पूर्वमीमांसायाः भाट्टादीनाम्। ईशाद्युपनिषदां ज्ञानकाण्डे अन्तर्भावः।

## उपनिषत्

उपनिषत् नाम ब्रह्मविद्या। उपपूर्वकात् निपूर्वकात् सद्-धातोः क्विप्प्रत्यये उपनिषत् इति स्त्रीलिङ्गरूपं प्राप्यते। षद्लृ विशरणगत्यवसादनेषु इति

पाणिनीयधातुपाठोक्तिः। तेन सदेः अर्थत्रयं प्राप्यते। तेन एवं तावद् धातुगतार्थत्रयम् उपनिषदिति शब्दस्य -

## विशरणम् -

विशरणं नाम विनाशः हिंसा वा। तेन मुमुक्षुः यां विद्याम् उप उपगम्य समीपं गत्वा तन्निष्ठतया तत्परायणो भूत्वा नि निश्चयेन तां परिशीलयन्ति, तेन या विद्या तस्य अविद्यादिसंसारबीजं सीदति विशरणं प्राप्नोति विनश्यति इत्यर्थः।

## गतिः

मुमुक्षुः यां विद्याम् उप उपगम्य समीपं गत्वा तन्निष्ठतया तत्परायणो भूत्वा नि निश्चयेन तां परिशीलयन्ति, तेन या विद्या तं परं ब्रह्म गमयति इति ब्रह्मविद्यागमयत्रीत्यर्थः।

उपगतस्य मुमुक्षोः निश्चयेन या विद्या गर्भवासजन्मजरामरणाद्युपद्रवं अवसादनम् संसारचक्रम् अवसादयति शिथिलयतीत्यर्थः।

अत्र ये अर्थाः स्वीकृताः ते खलु श्रीमद्भगवत्पादैः शङ्कराचार्यैः तदीयायां कठोपनिषदः भाष्यभूमिकायाम् आलोचिताः। एवं च भाष्यम्- ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसद्य उपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणात् हिंसनात् विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते इति।

## उपनिषदां वेदान्तत्वम्

उपनिषद् वेदान्तशब्देनापि अभिधीयते। कथमिति प्रश्ने वेदान्तशब्दस्य ज्ञानमादौ आवश्यकं भवति। तत्र वेदान्तो नाम यद्यपि न्यायसूत्रगीतादिसकलानां परम्परायां ग्रहणं

विद्यते तथापि उपनिषदः विशेषतो वेदान्तशब्देन भवन्ति अभिहिताः। एवं च वेदस्य अन्तः इति वेदान्तः। तेन मनसि एवं ज्ञानमुदेति तर्हि वेदस्य अन्तिमे उपनिषत् प्राप्यते इति। न, यद्यपि प्रायः वेदानाम् अन्ते एव उपनिषत् प्राप्यते, तथापि तदर्थम् एवम् अभिधा न जाता। अत्र अन्तशब्दस्य अर्थः रहस्यम् इति ज्ञेयम्। वेदस्य अन्तः रहस्यम् इत्यर्थः तेन प्राप्यते। वेदस्य रहस्यं सारः अत्र गृहीतः अस्तीत्याशयः। उपनिषदः खलुवेदस्य सारभूता वर्तन्ते। उपनिषदि एव उपनिषच्छब्देन रहस्यं ज्ञायत इत्यस्ति आम्नातम्। एवं च केनोपनिषदि उपनिषच्छब्दः रहस्यविद्यार्थे प्रयुक्तः चतुर्थे खण्डे -

**उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ इति।**

अथ एवमागतं यत् कदाचित् वेदस्य अन्तिमभागे कदाचित् मध्ये वेदस्य सारभूता उपनिषदः प्राप्यन्ते। वस्तुतः प्रायः आरण्यके ब्राह्मणे वा प्राप्यते उपनिषत्। कदाचित् संहितायामपि। तत्र मुक्तिकोपनिषदि अष्टोत्तरशतसंख्यकानाम् उपनिषदां परिचयः प्राप्यते। तदनुसारेण प्रतिवेदमेवम् उपनिषदां संख्या -

- ऋग्वेदे दश उपनिषदः।
- शुक्लयजुर्वेदे नवदश उपनिषदः।
- कृष्णयजुर्वेदे द्वात्रिंशत् उपनिषदः।
- सामवेदे षोडश उपनिषदः।
- अथर्ववेदे एकत्रिंशत् उपनिषदः।

एतानि विहाय अपि उपनिषदः सन्ति बह्व्यः। किन्तु तासां सम्प्रदाये नास्ति तथा स्थानम्। तासां किल उपनिषदां विशेषदैवताश्रयत्वात् न उत्तरमीमांसायामन्तर्भावः। अपि कासांचन अर्वाचीनत्वात् सम्प्रदाये न स्थानम्।

अथ केवलम् दशानां मुख्यत्वं स्वीक्रियते सम्प्रदाये। केचन तु एकादशेति। ताः खलु एवं-

**ईश-केन-कठ-प्रश्न-मुण्ड माण्डूक्य तित्तिरिः ।**

**ऐतरेयं अपि छान्दोग्यं बृहदारण्यकं तथा ॥ इति।**

एवं च श्वेताश्वेतरोपनिषत् कौषीतक्युपनिषत् इत्यनयोः अपि यद्यपि प्रमाणकोटौ अन्तर्भावः अस्ति तथापि न तयोः मुख्यत्वम् स्वीक्रियते।

एवं विभागे शङ्करभगवत्पादः एव मानम्। उपर्युक्तोपनिषदाम् आचार्यैः कृतानि भाष्याणि सन्ति। तासां विषयगाम्भीर्यादिकारणात् एव तासां वेदान्तसम्प्रदाये ग्रहणम्। तस्मात् ता दश एव मुख्यत्वेन स्वीक्रियन्ते सम्प्रदाये। केचन श्वेताश्वेतरोपनिषदः भाष्यमपि भगवत्पादैः कृतमिति वदन्ति।

कौषीतक्युपनिषत् तु आचार्यैः तत्र तत्र श्रुतिप्रमाणत्वेन स्वीकृता। मैत्रायण्यादीनामपि तत्र केषाञ्चिन्मते अन्तर्भावः।

## बोधप्रश्नाः

- किं नाम प्रस्थानम्।
- कानि प्रस्थानानि। नामानि वदत।
- श्रीमद्भगवद्गीता प्राप्यते - (क) शान्तिपर्वणि (ख) भीष्मपर्वणि (ग) अनुशासनपर्वणि
- वेदान्तसूत्रप्रणेता कः।
- प्रस्थानत्रये स्मृतिः न्यायात् प्रबला। सत्यं वा एतत्।
- उपनिषच्छब्दस्य प्रकृतिप्रत्ययनिरूपणपूर्वकम् अर्थ वदत।
- वेदान्तशब्दस्य अर्थ समासेन लिखत।
- कति उपनिषदः। तत्र कति मुख्याः।
- मुख्योपनिषदां मुख्यत्वे किं मानम्।
- मुख्योपनिषदां सङ्ग्रहश्लोकं लिखत।
- पद्यात्मकोपनिषदः का संज्ञा।

- कठोपनिषत् - (क) ऋग्वेदीया (ख) सामवेदीया (ग) यजुर्वेदीया वा।

**उपनिषत्परिचयः**

वेदान्तस्य विषयः खलु जीवब्रह्मणोः ऐक्यं यत् शुद्धचैतन्यम्। उपनिषदः वेदान्तत्वात् समान एव विषयः। उपनिषदः तदेव प्रतिपादयन्ति।

## ईशोपनिषत्

शुक्लयजुर्वेदस्य माध्यन्दिनशाखायाः संहितायां खलु चत्वारिंशद् अध्याया राजन्ते। तत्र अन्तिमाध्यायः एव ईशोपनिषन्नाम्ना प्रसिद्धः। आचार्येण तु काण्वशाखानुसारिपाठस्य भाष्यं व्यरचि। शाखाभेदेन तत्र तत्र पाठभेदा दृश्यन्ते।

**नामकरणम्**

इयम् उपनिषद् ईशा वास्यमिदं सर्वम् इत्यादिमन्त्रैः आरभ्यते, तस्मात् अस्या ईशावास्योपनिषद् इत्यपि अभिधा। शुक्लयजुर्वेदस्य अपरं नाम वाजसनेयीसंहिता इत्यतः अस्य उपनिषदः वाजसनेयसंहितोपनिषद् इत्यपि नाम। केवलं संहितोपनिषद् मन्त्रोपनिषत् इत्यपि क्वचिदुच्यते ।

**रीतिः अध्यायादिः अपि**

इयमुपनिषत् पद्यात्मिका। एकः एव अध्यायः। तथा अपि अष्टादश मन्त्राः सन्ति।

**विषयः**

उपनिषदि अस्याम् ईशस्य निर्मातृत्वादिगुणा आम्नाताः। आत्मनः याथात्म्यप्रकाशनमेव अत्र

विषयत्वमवगाहते। अत्र उच्यते हे मनुजाः इदं सर्वम् अनित्यं सत् तेन ईश्वरेण व्याप्तं विद्यते। अनित्यानां

त्यागेनैव आत्मा प्राप्यते। कस्यचिद् वा धनम् आकाक्ष्यते। अर्थात् धनाकाङ्क्षां मा कुरु। सर्वमेव तस्य

ईशस्य तस्माद् तमेव इच्छतु तेन सर्वावाप्तिः फलतीत्याशयः। अत्र निवृत्तिमार्गगामिनां कृते उपदेशः।

निवृत्तिः सन्न्यासः समस्तकर्मभ्यः उपरतिः। तस्माद् एवं मन्त्रः -

**ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ॥ इति।**

यः शतं समाः जीवितुमिच्छति तेन कर्म कार्यमेव। न खलु कर्म कुर्वाणः कश्चित् कर्मलेपहीनः भवति। वेदान्ते हि पापपुण्ये वर्जनीये। द्वयोरेव संसारचक्रपतनकारणत्वात् छर्दितान्नवत् हेयत्वम्। तस्मात् यदि त्वं प्रवृत्तिमार्गे तिष्ठन् संसारं भेत्तुमिच्छसि तर्हि ईश्वरशरणं विहाय नास्ति निर्लेपस्य साधनम्। अत्र साधकः प्रवृत्तिमार्गी संसारी गृहस्थ इति।

ये तावत् आत्मानम् अजानन् शरीरं त्यजन्ति ते सर्वे असुर्या इति लोकं गच्छति। असुर्यः इति परमात्माभावात् देवादीनां समेषामेव लोकाः असुर्याः। ते सर्वे एव लोकाः अन्धकारावृताः। एवं च -

**असुर्या नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ इति।**

अथ आत्मदर्शिनः विषये उच्यते यत् यः पुरुषः सर्वत्रैव अन्तः बहिश्च आत्मानं पश्यति स कमपि जुगुप्सनीयं निन्दनीयं घृण्यं वा न मनुते। तदा भूतानि सर्वाणि तस्य पुरुषस्य आत्मैव भवति। ब्रह्म किल निरञ्जनम् अपापविद्धं सर्वदुःखरहितमानन्दस्वरूपम्। अथातो न विद्यते तस्य पुरुषस्य मोहः शोकः वा। स सर्वत्र आत्मानमेव पश्येत्। एवं च -

**यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।**

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ इति।**

तद् ब्रह्म स्वप्रकाशकत्वसर्वव्यापित्वसर्वज्ञत्वसर्वनियन्तृत्वादिगुणान्वितम्। प्रजापत्यादीनां कर्म तेनैव विहितम्। तस्मात् केवलकर्मणि निरताः अन्धकारं गच्छति, दैवतादिज्ञानमवलम्ब्य अपि ये तिष्ठन्ति ते तु अन्धकारं गच्छतितमाम्।

एवं चविद्यते तावत् अपर एको मन्त्रः। यत्र उच्यते तावत् सत्यस्वरूपस्य आदित्यमण्डलस्थः पुरुषः हिरण्मयेन ज्योतिर्मयेण पात्रेण आवृतो विद्यते। अथ पूषसमक्षं प्रार्थना, हे पूषन् सूर्य अपसारय तत् पात्रं येन मम ब्रह्मोपलब्धिः भवेत्। एवं च -

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ इति। (ईश. १५)

## केनोपनिषत्

सामवेदस्य जैमिनीयशाखायाः तलबकारब्राह्मणे प्राप्यते उपनिषद् इयं केननाम्नी।

### नामकरणम्

तलबकारब्राह्मणे अस्या अन्तर्भावात् तलबकारोपनिषत् इत्यपि अभिधा। अत्र केन केनेति आरम्भे बहुधा पाठात् अस्या उपनिषदः केनेति अभिधा।

**रीतिः अध्यायादिः अपि**

इयं गद्यपद्यात्मिका। अत्र अध्यायाः खण्डनामकाः। तेन अत्र चत्वारः खण्डा विलसन्ति। तत्र प्रथमद्वितीयखण्डौ पद्यात्मकौ। तृतीयतुरीयखण्डौ अपि गद्यात्मकौ।

**विषयः**

अत्र प्रथमद्वितीययोः खण्डयोः आत्मोपदेशः विद्यते गुरुशिष्यसंवादमाध्यमेन। शिष्यः तावत् स्वस्य प्रश्नान् स्थापयति गुरोः सकाशं यत् केन अस्माभिः सर्वं क्रियते, केन वयं संसारेऽस्मिन् आगताः, इमानि इन्द्रियाणि केन खलु स्वकर्मणि निरतानीति। गुरुस्तु सत्यनिष्ठः शिष्याज्ञानं निवारयति यत् स श्रोत्रस्य श्रोत्रं मनसोऽपि मनः, समेषाम् इन्द्रियाणां स एव इन्द्रः। यः तं जानाति स अमृतत्वं लभते। एवं च -

**श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः।**

**चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ इति। (केन १। २)**

शिष्यस्य प्रश्नः पुनः यत् यः इन्द्रियाविषयः, कथं ज्ञानविषयीभवेत् स इति। अथ गुरुणोच्यते यत् तद् ब्रह्म खलु ज्ञानाज्ञानविषयभिन्नम्। वचसा मनसा चक्षुषा वा सर्वैः इन्द्रियैः यन्न विषयीभवति तदेव तद् ब्रह्म। तर्हि कथं भवतीति चेत् तस्य भासा सर्वमिदं विभाति इत्यादिश्रुतेः प्रकाशशीलस्यैव प्रकाशे हेतुत्वात्। न हि आत्मानं कोऽपि प्रकाशयितुं शक्यते इति वक्तव्यं सूर्यस्य आत्मप्रकाशे प्रत्यक्षमेव प्रमाणम्। अत्र खलु आत्मतत्त्वज्ञानं दीयते गुरुणा शिष्याय। जीवब्रह्मणः ऐक्ये एव वेदान्तस्य तात्पर्यात्।

अथ शिष्यज्ञानपरिपाकार्थं गुरुः वादं कुरुते यत् यदि त्वया मन्यते यत्तद्ब्रह्म त्वया ज्ञातं तर्हि तद् भ्रमः तव, अल्पमेव ज्ञातं त्वया। अतः अधुनापि ब्रह्म त्वया विचारणीयम्।

एवं च एवमुच्यते तावद् यत् आत्मज्ञानं यदि अस्मिन् जन्मनि विद्यते तदा महान् लाभः। नोचेत् पतनं निश्चितम्। एवं च आत्मज्ञानाभावे जीवः पौनःपुन्येन संसारे आविद्यते, जराव्याधिभयादिदुःखं सहते, न खलु आनन्दात्मकावाप्तिं विहाय शोकपरागः भवितुं शक्यः। तस्माद् गुरुमुखेन श्रुतेरुपदेशः -

**इह चेदवेदीदथ सत्यमस्तिन चेदिहावेदीन्महती विनष्टिः।**

**भूतेषु भूतेषु विचित्य धीराःप्रेत्यास्माल्लोकादमृता भवन्ति ॥ इति। (केन २। ५)**

अत्र तृतीयतुरीयाध्याये आख्यानमुखेन श्रुतिः उपदिशति। एवं तावद् आख्यानम् -

कदाचित् देवासुरसंग्रामो जातः। देवाः विजयन्ते स्म। वस्तुतः सर्वकारणात्मकस्य ब्रह्मणः हेतुत्वाद् एव तेषां विजयः, तथापि मोहान्वितास्ते वयं विजयिन इति भावयामासुः। तदा निराकारोऽप्यात्मा स्वात्मानं देवानां ज्ञानप्रचोदनार्थं साकारो बभूव। यक्षरूपं पूज्यरूपं धरत् ब्रह्म प्रेक्ष्य देवाः अग्निं प्राहुः- हे जातवेद विजानीहि सम्यग्रूपेण किमिदं यक्षम् इति। अथ तथेत्युक्त्वा अग्निः जगाम। अग्निं प्रेक्ष्य तद् यक्षमुवाच कोऽसीति। अग्निरपि स्वपरिचयं ददौ। ब्रह्म किं तव सामर्थ्यमिति अवोदत्। अग्निः जगति सर्वं दग्धुं शक्नोमीत्यवदत्। तदा ब्रह्म तृणमेकं स्वीकृत्य एतद् दह इत्युवाच। सर्वशक्त्या अपि दग्धुं न शशाक तृणं सोऽग्निः। स देवान् आगम्य उवाच यक्ष विज्ञातुम् अशकमहम् इति।

अथ वायुं प्रेषयामासुः। वायुरपि तथैव पृष्टः यक्षेण। स चोवाच पृथिव्यां सर्वमहं ग्रहीतुं शक्नोमीति। पूर्ववद् अस्मै अपि तृणग्रहणाय ददौ। किन्तु अयमपि असमर्थोऽभवत्। निराशश्च प्रत्यायातः।

तदा इन्द्रं प्रेषयामासुः। इन्द्रे गते तु सहसा तिरोहितम्। अथ तद् ज्ञातुं तत्र ध्यानमग्नः इन्द्रः आकाशे स्त्रीरूपं ददर्श, सा खलु उमा रुद्रपत्नी हैमवती, ब्रह्मवैवं दधार। तेन उमैव ब्रह्मविद्या। अथ तां पप्रच्छ इन्द्रः, तस्या एव वचनात् स ब्रह्म अजानत। अत्रैवमाशयो यत् गुरूपसदनं विना न विद्यते ज्ञानोन्मेषः इति।

## कठोपनिषत्

कृष्णयजुर्वेदस्य कठशाखायां प्राप्यते इयमुपनिषत्।

**नामकरणम्**

कठशाखायां पठितत्वात् अस्याः कठेति नाम। काठकोपनिषद् इत्यपि उच्यते सम्प्रदाये।

**रीतिः अध्यायादिः अपि**

इयं पद्यात्मिका। अत्र द्वौ अध्यायौ स्तः। प्रत्यध्यायं तिस्रः वल्ल्यः लसन्ति।

**विषयः**

कठोपनिषदि खलु आख्यायिकामुखेन ब्रह्मविद्या उपदिष्टा। आख्यायिकायाः विषय एव ब्रह्मविद्यास्तुतिः। आख्यायिका ब्रह्मविद्यास्तुत्यर्था इति शङ्करभगवत्पादः तदीये कठोपनिषद्भाष्ये।

कदाचित् वाजश्रवसः विश्वजिन्नामकं यागमाचरितवान्। अस्मिन् यागे सर्वमेव दक्षिणात्वेन दातव्यं भवन्ति। तस्य पुत्रः आसीत् नचिकेताः। स अपि कुमारः आसीत्। वाजश्रवसेन जीर्णगावः दक्षिणात्वेन दीयन्ते इति दृष्ट्वा नचिकेताः विचारयामास यत् अधमदक्षिणादानेन पितुः पापं स्यात्। तेन अपि तस्मिन् श्रद्धा आविवेश। अथ स श्रद्धावान् पितरमुवाच पितः मां कस्मै दास्यसीति। बालकस्य वचनमिति मत्वा यदा

वाजश्रवसः कर्णं न ददौ तदा वारं वारं नचिकेताः स्ववाक्यावर्तनं चकार। अथ क्षिप्रः सन् स उवाच मृत्यवे त्वा ददामीति। तदैव सहसा किमिदं मया उक्तमिति खिन्नमनाः संवृत्तः वाजश्रवसः। किन्तु नचिकेतास्तु श्रद्धावान् अचिन्तयत् अहं तु शिष्यपरिषदि अनेकेषु उत्तमः मध्यमो वा नाहम् अधमः

कदाचित्। तस्मात् माम् एव दक्षिणात्वेन यच्छति चेत् अस्ति तत्र किमपि विशेषम्। अतः सः अवोचत् पितः भवान् सत्यं पालय, चिन्तां मा कार्षीरिति। तेन नचिकेताः यमसदनं ययौ।

यमसदने तदा यमः नासीत्। तत्र अपि स रात्रीत्रयमुषितवान्। अथ गृहे प्रत्यायाते यमे गृहपरिषदा तेन सर्व ज्ञातम्। अनश्नन् खलु अस्ति अतिथिः, अपि अपि स ब्राह्मणः। गृहे अप्राप्ताहारः अतिथिः साक्षात् अग्नितुल्यः सर्वं अपि तस्य पुण्यादिकं हरति। तस्मात् पाद्यादिभिः पूजितः तेन नचिकेताः। ततः प्रायश्चित्तार्थमुवाच भो नचिकेतः यतः तिस्रो रात्र्यः अभक्षन् उषितवान्, तेन प्रतिरात्रि एकैकं वरम् इच्छेति। अथ नचिकेताः प्रथमं वरम् इष्टवान् अहमत्र आगतः इति पिता निश्चयेन उत्कण्ठितः विद्यते। तस्मात् तस्य शान्तिः यथा स्यात् तथा, अपि अपि भवत्सकाशात् गमनात् परं प्रेतलोकाद् गच्छामि इत्यतः मां पूर्वमिव जानीयात् इति करोत्विति। यमः सन्तुष्टः सन् ईप्सितं वरं ददौ।

ततः स द्वितीयवरम् ऐच्छत् स्वर्गे लोके हे मृत्यो त्वं नासि। पिपासादिदुःखमपि नास्ति । तस्मात् हे यम तं स्वर्गलोकप्राप्तिसाधनं अग्निं ब्रूहीति। तदा यमः अग्निविद्यां शिक्षापयामास नचिकेतसे। अध्यापितश्च स यथायथं सर्वं प्रोवाच। येन उत्तमशिष्यः अयमिति जानन् हृष्टः मृत्युः अधिकवरं ददौ। स अपि विविधरत्नमयीं मालामेकां नचिकेतसे समर्थ्य उवाच अधुना प्रभृतिः यः अग्निः ते उपदिष्टः स तवैव नाम्ना भविता। तस्य नाचिकेतस इति नाम लोके प्रथितं भवितेति।

अथ तृतीयं वरं वृणुते यत् मनुष्ये प्रेते सति केचन वदन्ति अस्ति केचन नास्तीति वदन्ति। अस्मिन् विषये या विद्या विद्यते तां मे ब्रूहीति। मृत्युरुवाच अयं विषयो देवैरपि पृष्टः। किन्तु अयं न खलु सुविज्ञेयः, यतो हि सूक्ष्मः। तस्मात् हे नचिकेतः पृच्छ अन्यं वरम्। अयं अपि न काङ्क्षयः। नचिकेताः श्रद्धालुः तमेव प्रश्नं चकार पुनः। महतः लाभः न खलु सारल्येन भवति। तस्मिन् वर्त्मनि अस्ति इन्द्रियपरिपूरकव्यसनव्रातः। किन्तु ब्रह्मविद्या न खलु विवेकवैराग्यादिहीने अधिकारिणि प्रतिष्ठिता स्यात्। तस्मात् भूमिधननारीपुत्रपौत्रशतवर्षीयजीवितादिप्रलोभनपुरःसरं नचिकेतसं विचारयति यमः। किन्तु तथापि नचिकेताः स्ववचसि एव प्रतिष्ठितः। स खलु अनित्यानां तेषां धर्मं जानाति। तस्मादेव -

**श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः।**

**अपि सर्वं जीवितमल्पमेवतवैव वाहास्तव नृत्यगीते ॥ इति।**

एवं निकषप्रस्तरेण यथा सुवर्णस्य याथार्थ्य परिज्ञायते तथैव नचिकेता अपि विद्याधारणपटुर्वटुरिति बुद्ध्वा मृत्युः तस्मै ब्रह्मविद्यां प्राह।

अस्याम् उपनिषदि ब्रह्मतत्त्वप्रतिष्ठापकमन्त्राः सन्ति बहवः। कणशः तावत् उदाह्रियते ज्ञानाय

तत्र रथरूपककल्पनात्मको मन्त्रः बहुप्रसिद्धः। एवं च जीवात्मा एव रथी रथस्वामी, शरीरं तु रथं, बुद्धिः सारथिः, मनः अपि वल्गा प्रग्रहं वा, तत्र इन्द्रियाणि अश्वाः, तथा अपि गमनमार्गस्तुइन्द्रियविषयाः इति कल्पितम्। तेन शरीरेन्द्रियमनःसहित एव आत्मा मनीषिभिः संसारी इत्युच्यते। तेन केवलस्य आत्मनः भोक्तृत्वं निराकृतम्। कथं तर्हि प्राप्यते आत्मत्वप्राप्तिः इति चेत् रथी सत्पुरुषः चेत् सम्भवेत्, नोचेत् दुष्टेन रथिना आत्मावाप्तिः कपोलकल्पितेव। तत्रैवं मन्त्राः

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव अपि ॥**

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥**
**यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥**

**यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ इति।**

## प्रश्नोपनिषत्

अथर्ववेदस्य पैप्पलादशाखायामियं प्राप्यते उपनिषत्।

**नामकरणम्**

अत्र गुरोः समीपं प्रश्नपुरःसरं ब्रह्मविद्या आम्नाता। अध्यायानां नाम अपि प्रश्नः इति तेनैव इयं प्रश्नोपनिषदिति।

**रीतिः अध्यायादिः अपि**

इयं गद्यपद्यात्मिका। तथापि बाहुल्येनात्र गद्यं विद्यते मध्ये मध्ये क्वचित् पद्यम्। अत्र प्रश्ननामकाः अध्यायाः सन्ति षष्ठसंख्यकाः।

**विषयः**

कदाचित् भरद्वाजतनयः सुकेशा, शिबिपुत्रः सत्यकामः, गर्गगोत्रीयः सौर्यायणिः, अश्वलतनयः

कौसल्यः, भृगुवंशीयः वैदर्भिः, कत्यतनयः कबन्धी अपि ब्रह्मजिज्ञासवः समित्पाणयः सन्तः पिप्पलादमहर्षिः ययुः। तान् प्रेक्ष्य वर्षमेकं ब्रह्मचर्येण श्रद्धया तपसा अपि

स्थातुमुपदिदेश। ततः गते वर्षे ते पुनराजग्मुः।कबन्धी उवाच हे भगवन् इमाः प्रजाः कुतः प्रजायन्ते इति। तदा पिप्पलादः प्रजापतेः सर्जनमुवाच। तथा अपि सृष्ट्यादिविषयमुक्त्वा चन्द्रादिलोकगमनसामर्थ्यमुवाच।

अथ वैदर्भिः पप्रच्छ भगवन् के देवाः प्रजाशरीरान् धरन्तीति, कः वरिष्ठश्चेति। तदा पिप्पलादः आकाशादिषु देवत्वारोपेण तमुपदिदेश। ततः उपदेशक्रमेण प्राणः वरिष्ठ इति आगतम्। एवं चसर्वमेव प्राणाश्रितम्। तत्रैवं निदर्शनं यत् यथा चक्रनाभौ अराः चक्रधारणशलाकाः प्रतिष्ठिता भवन्तीति।तदा कौसल्यो बुद्धिमान् विचार्य प्राणस्य अनित्यत्वं पप्रच्छ भगवन् प्राणः कुतः जायत इति। तथा अपि तेन प्राणस्य कार्यादिकमपि जिज्ञासितम्। तदा पिप्पलादः सन्तुष्टः सन् आत्मनः प्राणस्य जनिरित्यादिविषयमुपदिदेश। पञ्चविधप्राणानां वर्णनमपि तेन कृतम्। तथा प्राणः एक एव मुख्यः कार्यभेदात् पञ्च। ते हि प्राणापानव्यानोदानसमानाः। प्राणः सम्मुखगमनवान् नासाग्रवर्ती। अपानः अवाम्गमनवान् पाय्वादिस्थानवर्ती। व्यानः सर्वत्रगमनवान् अखिलशरीरवर्ती। उदानः कण्ठस्थानीयः ऊर्ध्वगमनवान् उत्क्रमणवायुः। समानश्च शरीरमध्यगताशितपीतान्नादिसमीकरणकरः वायुः।

एतावता अनित्यस्य संसारस्यालोचनमासीत्। अथ सौर्यायणिनः प्रश्नात् परविद्यायाः साधनादिकं वदति। ततः सत्यकामेन प्रणवसाधनं पृष्टम्। पिप्पलादेन परापरब्रह्मणोः प्रणवत्वप्रतिस्थापनपुरःसरं प्रणवं व्याख्ययामास। एवमन्त्ये सुकेशा उवाच यत् कोसलदेशीयराजकुमारेण स पृष्ट आसीद्यत् स षोडशकलं पुरुषं वेत्ति न वेति। तदा अजानता तेन राजपुत्रः प्रेषितः। अधुना भगवते पुरुषः कोऽसौ इति प्रश्नः।

अथ पिप्पलादः पुरुषं वेदयति। पुरे देहे शेते इति पुरुषः। तस्मात् पुरुषः अस्मिन् देहाकाशे एव विराजते। स खलु आत्मा। तत्र प्राणादीनां विद्यते पुरुषे एव लयः। ते नामरूपात्मके प्रणष्टा भवन्ति, पुरुष एव विराजते। यः पुरुषं जानीयात् स मृत्युं तरति

तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय इत्यादिश्रुतेः। तस्मादेव आम्नातम् -

**अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः।**

**तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति ॥ इति।**

एवमस्याम् उपनिषदि आदौ आत्मभिन्नपदार्थवचनपुरःसरं तेषां अपि अपवादेन आत्मतत्त्वं प्रतिष्ठापितम्।

## मुण्डकोपनिषत्

अथर्ववेदीया इयम् उपनिषत्।

**नामकरणम्**

मुण्डकाभिधैरध्यायैर्विभक्तत्वात् अस्या एवं नाम।

**रीतिः अध्यायादिः अपि**

पद्यात्मिकेयम् उपनिषत्। मुण्डकनामकेन अध्यायत्रयेण विराजते। प्रतिमुण्डकं अपि खण्डद्वयमस्ति।

**विषयः**

अत्र ब्रह्मविद्यापरम्परा निर्देशिता अस्ति। एवं च ब्रह्मा आदौ विद्यामुपदिदेश अथर्वणे। अथर्वा अङ्गिराय, अङ्गिरा भारद्वाजसत्यवहाय, सत्यवहश्च अङ्गिरसे उपदिदेश। अत्र परापरविद्यायाः सङ्कलनं विद्यते। एवं च-

**तत्रापरा ऋग्वेदो यजुर्वेदः सामदेवोऽथर्ववेदः**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।**

**अथ परा यया तदक्षरमधिगम्यते ॥ इति ।**

अस्यामुपनिषदि बहवः विषयाः आबहोः कालात् विचारपथे मनीषिणां भवन्ति। बहुश्रुताः मन्त्रा अपि अत्र प्राप्यन्ते। यथा सत्यमेव जयते इति। तस्य सम्पूर्णशरीरं तावत् -

**सत्यमेव जयते नानृतं**

**सत्येन पन्था विततो देवयानः।**

**येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ इति।**

अस्यां तृतीयमुण्डके प्रथमखण्डे एकस्मिन्नेव वृक्षे तिष्ठन्तौ पक्षिणौ वर्णितौ। तयोरेकः स्वादु फलं भुङ्क्ते, अपरश्च अभक्षन् केवलद्रष्टरूपेण तिष्ठति। आदिमः जीवात्मा, अपरः परमात्मा। स खलु कर्म कुर्वन् पापपुण्यावृतः संसारे पतति। अपरः असङ्गः निर्विकारः। किन्तु यदा संसारानलसंतप्तः सन् स स्वात्मनि नियोजयति निरतिशयानन्दप्रापणहेतोः तदैव वीतशोकः भवति।

अपिच, एवं रूपकमुपस्थापितं यत् प्रणव एव धनुः शरः बाणो वा जीवात्मा, लक्ष्यं तु परमात्मा परब्रह्म, प्रमादहीनः संयतपुरुषः एव तस्य भेदने क्षम इति। ततः शरः यथा लक्ष्ये तन्मयः तद्गतः विद्यते तथैव जीवात्मापि परमात्मनि। एवं च -

**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ इति।**

## माण्डूक्योपनिषत्

अथर्ववेदीया इयम् उपनिषत्।

**नामकरणम्**

न विशेषः।

**रीतिः अध्यायादिः अपि**

गद्यात्मिका इयम् उपनिषत्। अत्र अपि द्वादश कण्डिकाः सन्ति।

**विषयः**

अस्यां जीवस्य अवस्थात्रयम् उच्यते। जाग्रत्, स्वप्नः, सुषुप्तिः चेति अवस्थात्रयम्। अवस्थासु सन्ति भिन्नानि शरीराणि। शीर्यते इति शरीरम्। एवं च जाग्रति स्थूलः, सूक्ष्मं स्वप्ने, कारणं सुषुप्तौ। स्थूलशरीरोऽपि व्यष्टिसमष्टिभेदेन द्विधा। व्यष्टिस्थूलशरीराभिमानी जीवः विश्वः। समष्टिस्थूलशरीराभिमानी जीवः वैश्वानरः। व्यष्टिसूक्ष्मशरीराभिमानी जीवः तैजसः। समष्टिसूक्ष्मशरीराभिमानी जीवः हिरण्यगर्भः। व्यष्टिकारणशरीराभिमानी जीवः प्राज्ञः। समष्टिकारणशरीराभिमानी जीवः ईश्वरः। एतेषां वेदान्तनये प्रौढ्यन्थेषु आलोचनाबाहुल्यं तत्र तत्र दृश्यते। विद्यारण्यमुनिकृतौ पञ्चदश्याम् अस्मिन् विषये विद्यते महाती आलोचना। इयमुपनिषदेव विषयस्य तस्य सूतिः। यद्यपि अस्ति इयं लघुकाया तथापि विषयगाम्भीर्यं गौडपादाचार्यकृतमाण्डूक्यकारिका तस्याश्च शङ्करभगवत्पादैः कृतं भाष्यं स्पष्टं प्रकाशते।एतेषाम् अवस्थात्रयवर्णनान्तरं समेषां न्यक्करणपुरःसरं तुरीयं ब्रह्म प्रतिपादयति। एवं च -

**नान्तः प्रज्ञं न बहिष्प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्।**

**अदृष्टमव्यवहार्यमग्राह्यम-लक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं**

**प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते। स आत्मा। स विज्ञेयः ॥ इति।**

प्रतिवेदं महावाक्यमेकं स्वीकृतम्। तदेव महावाक्यं विद्यते यत्र जीवब्रह्मणः ऐक्यं सुस्पष्टं प्रकाशितम् इति। अस्यां तु अथर्ववेदीयायामुपनिषदि अथर्ववेदीयमहावाक्यम् अस्ति (माण्डूक्य. २) इति। तेन उपनिषत्सु अस्याः स्थानमवश्यमेव आन्यतम्यं भजते।

## तैत्तिरीयोपनिषत्

कृष्णयजुर्वेदीयतैत्तिरीयशाखायाः तैत्तिरीयारण्यके प्राप्यते इयम् उपनिषत् ।

### नामकरणम्

तैत्तिरीयारण्यकस्य अंशत्वाद् अस्याः तैत्तिरीयेति नाम।

### रीतिः अध्यायादिः अपि

गद्यात्मिकायामस्याम् उपनिषदि क्वचित् श्लोकः प्राप्यते। अस्याम् अध्यायः वल्लीति उच्यते। तथा ह्यत्र तिस्रो वल्ल्यः सन्ति। तासां नामानि यथाक्रमं शीक्षावल्ली, ब्रह्मानन्दवल्ली, भृगुवल्ली चेति। वल्ल्योऽपि अनुवाकेन विभक्ताः। तत्र शीक्षायां द्वादश, ब्रह्मानन्दे नव, भृगौ अपि दश अनुवाकाः सन्ति।

### विषयः

अस्यामादौ वर्णानामुच्चारणविषयः आम्नातः। शिक्षाग्रहणं कथं स्यात् ब्रह्मचर्यादिपालनपूर्वकं तदत्र निबद्धम्। सदा सदाचाराचरणनिष्टतां शिक्षापयति। अध्ययनसमापनान्ते समावर्तनकाले आचार्यस्य शिष्येभ्यः उपदेशः नितरां वैदिकनिष्ठाया धारकतया विराजते। एवं च -

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।**

**आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ इति।**

मातृपित्रादीन् देवबुद्ध्या पूजनमित्यादिसदाचारशिक्षणमत्र उपन्यस्तम्। तेन

**मातृदेवो भव । पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।**

इत्यादिमन्त्रा अत्रत्या एव।अस्यामेव द्वितीयवल्ल्यां **सह नाववतु** इति,**शन्नो मित्रः** इति अपि शान्तिमन्त्रौ प्राप्येते। सच्चिदानन्दस्वरूपस्य यत् श्रुतिप्रमाणं तदस्याम् उपनिषदि विद्यते यच्च बहूद्धृतमपि **सत्यं ज्ञानमनन्तं ब्रह्म** इति। अत्र पञ्चभूतानामपि सृष्टितत्त्वमुपन्यस्तम्। येन आकाशादि क्रमेण सृष्टिः ज्ञायते। सृष्टिः किल ब्रह्मणः एव। एवं च -

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः।**

**वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः।**

अत्रैव ब्रह्मणः स्वरूपविषये विश्रुतानि श्रुतिपदानि वर्तन्ते। यतो वाचो निवर्तन्ते इत्यादि तत्र निदर्शनम्।अथ भृगुवल्ल्यां वेदान्तप्रसिद्धकोशानां वर्णनमस्ति। यद्यपि श्रुतौ कोशशब्दप्रयोगः नास्ति तथापि तेषां कोशवदाच्छादकत्वात् कोशत्वमिति सम्प्रदाये। पञ्च कोशाः अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयश्चेति। एतेषां विषये सदानन्दयोगीन्द्रविरचिते वेदान्तसारे सुष्ठु निगदितं विद्यते। पञ्चदश्यामपि अस्मिन् विषये विस्तरेण आलोचना विहिता।

## ऐतरेयोपनिषत्

ऋग्वेदीयस्य ऐतरेयब्राह्मणस्थस्य ऐतरेयारण्यकस्य द्वितीयारण्यके विद्यते इयम् उपनिषत्।

**नामकरणम्**

ऐतरेयारण्यकस्य अंशत्वाद् अस्य ऐतरेयेति नाम।

**रीतिः अध्यायादिः अपि**

गद्यात्मिकेयम् उपनिषत्। अध्यायत्रयोपेता च। आदिमाध्याये खण्डत्रयं विद्यते। शेषाध्यायौ एकखण्डात्मकौ अपि स्तः।

**विषयः**

अस्यामेव ऋग्वेदान्तर्गतमहावाक्यं यत्सम्प्रदाये स्वीकृतं तदस्ति। **तद्धि प्रज्ञानं ब्रह्म।**

अपरविद्याज्ञानान्तरं तु कर्मणः असत्त्वात् पराविद्यायां प्रवेशनीयम्। अथ अत्र परगतिविषयः श्रुतिरुपदिष्टा। तत्र वामदेव इति ऋषिः श्रूयते यः खलु मातृगर्भे एव आत्मस्वरूपज्ञानं प्राप्य जनिं लेभे।

## बोधप्रश्नाः

- ईशोपनिषत् वाजसनेयसंहितायां कुत्र अस्ति।
- कः लोकः ईशोपनिषदि वर्णितः इति प्राप्यते।
- कति मन्त्राः उपलभ्यन्ते ईशोपनिषदि।
- कः यागः वाजश्रवसेन आचरितः।
- रात्रीणां कति यमगृहे नचिकेतसा यापितम्।
- रथरूपकम् अत्र प्राप्यते - (क) मुण्डके (ख) काठके (ग) तैत्तिरीये
- केन ऋषिणा प्रश्नोपनिषदि कौसल्यादयः उपदिष्टाः।

- अतिथिदेवो भव इति मन्त्रः प्राप्यते कुत्र।
- के पञ्चकोशाः।
- ईशोपनिषत् कीदृशी उपनिषत्, मन्त्रोपनिषत् वा आरण्यकोपनिषत् वा।
- शङ्कराचार्येण कस्याः शाखायाः ईशोपनिषन्मन्त्राणां भाष्यं व्यरचि।
- अथर्ववेदीयं महावाक्यं किम्।

## छान्दोग्योपनिषत्

सामवेदीये छान्दोग्यब्राह्मणे विद्यते इयम् उपनिषत्।

### नामकरणम्

छान्दोग्यब्राह्मणान्तर्गतत्वात् अस्या एवं नाम।

### रीतिः अध्यायादिः अपि

गद्यात्मिकेयम्। अस्याम् अष्टौ अध्यायाः सन्ति। अध्यायाश्च खण्डैः विभक्ताः।

### विषयः

अस्यां सामवेदगतमहावाक्यं सम्प्रदायस्वीकृतं तत्त्वमसि इति विद्यते। अस्य तत्त्वमसीति महावाक्यस्य वेदान्ते अस्ति महान् विचारः। प्रायः सर्वस्मिन्नेव वेदान्तविषयकग्रन्थे अस्ति अस्य विषयत्वेन ग्रहणम्। पञ्चदश्यां यद्यपि महावाक्यविषयकाध्यायः पृथग् अस्ति, तथापि तत्त्वमसि महावाक्यस्य विचारः प्रथमाध्यायेऽपि उपन्यस्तः। वेदान्तसाग्रन्थेऽपि अस्य प्रवर्तनं दृश्यते।

तत्र तावत् अस्यां षष्ठे अध्याये प्रपाठके वा उद्दालकः आरुणिरिति अपरनामधेयः स्वपुत्रं श्वेतकेतुं तस्यात्मज्ञानोन्मेषाय वदति ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वत्मसि श्वेतकेतो इति। अस्य वाक्यस्य लक्षणादिविचारपूर्वकं वेदान्ते तत्र तत्र ग्रन्थेषु सन्ति प्रकरणानि।

उपासनानि सगुणब्रह्मविषयकमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि इति वेदान्तसारे सदानन्दयोगीन्द्रेण उपासना लक्षिता। तानि अपि शाण्डिल्यविद्यादीनि छान्दोग्ये प्राप्यन्ते कानिचित्। अस्य तृतीयाध्यायस्य चतुर्दशखण्डमेव सर्वं खल्विदं ब्रह्म इत्यादिरूपेण शाण्डिल्यविद्या इत्युच्यते। अस्या उपनिषदः प्रारम्भः एव ओङ्कारोपाना इत्यनेन भवति। एवं तत्र बहूनि उपासनप्रकरणानि सन्ति। तत्र कानिचन उद्गीथोपासना, अक्षिपुरुषोपासना, सूर्योपासना, द्वारपालोपासना, प्राणोपाना इत्यादीनि ।

छान्दोग्यस्य अपरः बहुचर्चितविषयः उपासना इति।अपि अपि अस्यामुपनिषदि बद्व्यः आख्यायिकाः प्राप्यन्ते। तासु जाबालसत्यकामस्य आख्यायिका समधिकप्रसिद्धा। तां विहाय प्रवाहणजैवल्याख्यायिका, जानश्रुतिरैक्क्वाख्यायिका विद्यते। संवादपुरःसरः अपि ब्रह्मविद्या अत्र प्रकाशिता। तत्र नारदसनत्कुमारसंवादादिकं प्रसिद्धम्।

## बृहदारण्यकोपनिषत्

शुक्लयजुर्वेदस्य काण्वशाखीये तथा माध्यन्दिनशाखीये शतपथब्राह्मणान्तिमस्य आरण्यकस्य अन्तिमभागे विद्यते उपनिषदियम्। शाखाभेदेन क्वचित् पाठभेदः विद्यते।

### नामकरणम्

बृहदित्येव अस्या नाम्नि सार्थक्यं भजते। अनेन अस्या उपनिषत्सु बृहत्त्वं ज्ञायते। उपनिषत्सु बृहत्त्वात् आरण्यकांशत्वाद् अस्या बृहदारण्यकेति नाम।

### रीतिः अध्यायादिः अपि

इयं प्रायः गद्यात्मिका, मध्ये क्वचित् पद्यात्मकाः श्लोका भवन्ति। अस्याः काण्डत्रयम्। एवं च मधुकाण्डं, याज्ञवल्क्यकाण्डं तथा खिलकाण्डम्। प्रतिकाण्डम् अध्यायद्वयम्। तेन षडध्यायीयम् उपनिषत्। अध्यायाश्च ब्राह्मणैः विभक्ताः।

**विषयः**

उपनिषद्यस्यां प्रथमाध्यायस्य चतुर्थे ब्राह्मणे यजुर्वेदीयमहावाक्यं अहं ब्रह्मास्मि इत्युपलभ्यते ।

कर्मानुष्ठानकारी पुरुषः न सहसा विद्यते शक्तः निर्गुणविषयकज्ञानलाभं गन्तुम्। तस्मात् आदौ अत्र सगुणविषयकोपासनानि विहितानि। अत्राशयो यत् उपासनया अध्यारोपबलेन तत्त्वावगमः। अध्यारोपः नाम वस्तुनि अवस्तुनः आरोपः। अपवादः नाम आरोपितस्य निराकरणम्। यथा प्रसिद्धोदाहरणम् अन्धकारादिकारणात् रज्जौ सर्पम् आरोपयति पुरुषः। किन्तु सम्यक्प्रकाशादिना भ्रमनिरसने सति सर्पत्वारोपस्य अपवादपूर्वकं स जानाति यत् इयं रज्जुरिति। तथैव ब्रह्मणि जगत् इदम् अध्यस्तम्। अज्ञाननिरसनेन जगतः बाधे सति ब्रह्मोपलब्धिः भवति। तमेव अध्यारोपमवलम्ब्य प्रपञ्चस्य उत्पत्तिः, विस्तारः, उत्कर्षरूपः हिरण्यगर्भः प्रदर्शितः। एते सर्वे अनित्याः। **नेति नेति** इति विचारेण असंसारिणः असङ्गस्य आत्मनः तेभ्यः पृथक्करणं निदर्शितम्।

प्रथमाध्याये पञ्चमब्राह्मणे सप्तान्नप्रकरणे जगतः सापेक्षत्वं, सातिशयत्वं निदर्शितम्। तत् तु आत्मनः निरतिशयत्वादिरूपस्य बोधनायैव आम्नातम्। अत्रैव षष्ठे ब्राह्मणे प्रपञ्चस्य नामरूपात्मकस्य अनात्मत्वमाम्नातम्। एवमुच्यते -

**अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥**

**इति।**

तेन सत्ता प्रकाशकत्वमानन्दात्मकं अपि ब्रह्मरूपम्। तस्मात् सच्चिदानन्दमिति। नामरूपात्मकस्य कस्यचिद् अपि न नित्यता लोके। एवंकारेण अध्यारोपापवादाभ्याम् अनित्येषु वैराग्यं विधाय मुमुक्षुः आत्मेत्येवोपासीत् ।

अत्रैव बहुप्रसिद्धः जनकयाज्ञवल्क्यसंवादः याज्ञवल्क्यमैत्रेयीसंवादः अपिविद्यते। याज्ञवल्क्यमैत्रेयीसंवादश्च विख्यातः। मैत्रेयीं प्रति तत्पतेः याज्ञवल्क्यस्य उपदेशः चरमतत्त्वं व्यनक्ति। न खलु जगति प्रियं किञ्चद् विद्यते। आत्मा एव एकः प्रियः। आत्मैव सर्वत्र अनुस्यूतः। तस्यैव प्रियत्वात् सर्वं प्रियं भवति। एवं च -

**न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। इति।**

**पूर्णमदः पूर्णमिदम्** इति बहुश्रुतः शान्ति मन्त्रः अस्यामेव उपनिषदि।

॥श्रीः॥

# सूक्तानि – खण्डः४

## (इन्द्रसूक्त-अश्विनीसूक्त-सोमसूक्त-अग्निसूक्त-वरुणसूक्तानि)

**पाठरचना –**

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
    1. मूलसूक्तानि
    2. पदच्छेदः
    3. अन्वयः
    4. भावार्थः
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

### प्रस्तावना

संस्कृतवाङ्मयस्य प्रधानभूतः वेद एव । स च वेदः धर्मप्रतिपादकः इव अनेकान् तत्त्वानपि प्रतिपादयति । अयं च वेदः चतुर्धा विभक्तः- ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति । तत्र प्रथमवेदः भवति ऋग्वेदः मण्डलरूपेण विभिक्तः ।तथाच तत्र दशमण्डलानि सन्ति । एकैकस्मिन्नपि मण्डले अनेकानि सूक्तानि सन्ति । अस्मिन् पाठ्यक्रमे छात्राणां वैदिकवाङ्मयस्य स्वरूपं स्थालीपुलाकन्यायेन प्रतिपादनाय प्रसिद्धानि पञ्चसूक्तानि स्थापितानि । तानि च इन्द्रसूक्त-अश्विनीसूक्त-सोमसूक्त-अग्निसूक्त-वरुणसूक्तानि । तत्र इन्द्रसूक्ते इन्द्रदेवतायाः वैशिष्ट्यं प्रतिपादितं भवति । इन्द्रस्य प्रियतमं वस्तु सोमरसः इत्यपि प्रतिपादितम् । तत्प्रीत्यर्थम् अनेकानि कर्माणि कृतवानिति च बोधयति ।अश्विनीसूक्ते अश्विनी देवते प्रतिपादिते भवतः । तत्रापि विश्वेदेवानामपि वर्णनं कृतं वर्तते । अन्ते सरस्वत्याः मन्त्रोपि विद्यते इति विशेषः । सोमसूक्ते सोमस्य वर्णनं कृतं भवति । सोमस्य राजत्वमपि प्रतिपादितम् । अग्निसूक्तं सकलवेदस्य प्रथमसूक्तं भवति ।तत्र अग्निदेवस्य वर्णनं तत्स्वरूपं च प्रतिपादितम् स्तुत्यर्थम् । वरुणसूक्ते वरुणः पाशविनाशकरूपेण दृश्यते, वरुणप्रसादात् स्तोतारः पापरहिता भवन्ति। वरुणसूक्ते वरुणस्य माहात्म्यं स्फुटं दृश्यते । वरुण एव सूर्यं द्युलोके स्थापितवान् ।वरुणसूक्ते वरुणः पाशविनाशकरूपेण दृश्यते, वरुणप्रसादात् स्तोतारः पापरहिता भवन्ति। वरुणसूक्ते वरुणस्य माहात्म्यं स्फुटं दृश्यते । वरुण एव सूर्यं द्युलोके स्थापितवान् ।

## उद्देश्यम्

1. वैदिकसूक्तानांपरिचयोभवति
2. वैदिकपदानांस्वरूपंज्ञायते
3. इन्द्रादिदेवानांस्वरूपपरिचयोभवति

**4.** यज्ञादीनामपिपरिचयःसङ्क्षेपेणभवति

**5.** वैदिकमन्त्रानांप्रयोगःकथंकर्तुंशक्यतेइतिज्ञायते

# इन्द्रसूक्तम्

**प्रथममन्त्रः**

**प्रघान्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।**

**त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥१॥**

**पदच्छेदः**

प्र । घ॒ । नु । अ॒स्य॒ । म॒ह॒तः । म॒हानि॑ । स॒त्या । स॒त्यस्य॑ । कर॑णानि । वो॒च॒म् ।

त्रिऽक॑द्रुकेषु । अ॒पि॒ब॒त् । सु॒तस्य॑ । अ॒स्य । मदे॑ । अहि॑म् । इन्द्रः॑ । ज॒घा॒न॒ ॥१

**अन्वयः**

प्र। घ। नु । अस्य । महतः। महानि। सत्या। सत्यस्य । करणानि। वोचं ।

त्रिऽकद्रुकेषु । अपिबत् । सुतस्य । अस्य। मदे। अहिं। इंद्रः। जघान ॥१॥

**भावार्थः**

गृत्समदो ब्रवीति - महतो बलवतः सत्यस्य सत्यसङ्कल्पस्य अस्य इन्द्रस्य सत्यानि यथार्थानि महानि महान्ति करणान्यस्मिन् सूक्ते वक्ष्यमाणानि कर्माणि तु अद्य प्रवोचं - प्रकर्षेण वदामि॥

घेति प्रसिद्धिं द्योतयति । कानि तानि उच्यन्ते । त्रिकद्रुकेषु ज्योतिर्गौरायुः इत्येवंरूपेषु आभिप्लविकेषु अहःसु सुतस्याभिषुतं इन्द्रः सोमम् अपिबत् । ततः पीतस्यसोमस्य मदे - हर्षे संजाते सति इन्द्रोशत्रुं वृत्रमसुरं अहनत् ॥१।।

**<u>द्वितीयमन्त्रः</u>**

**अवंशे द्यामस्तभायद्बृहन्तमारोदसी अपृणदन्तरिक्षम् ।**
**स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥२॥**

**पदच्छेदः**

अवंशे । द्याम् । अस्तभायत् । बृहन्तम् । आ । रोदसी इति । अपृणत् । अन्तरिक्षम् ।

सः । धारयत् । पृथिवीम् । पप्रथत् । च । सोमस्य । ता । मदे । इन्द्रः । चकार ॥२

**अन्वयः**

अवंशे। द्यां । अस्तभायत्। बृहंतं। आ। रोदसी इति । अपृणत्। अंतरिक्षं ।

सः। धारयत्। पृथिवीं । पप्रथत्। च। सोमस्य। ता। मदे । इंद्रः। चकार ॥२॥

**भावार्थः**

अवंशे - आकाशे द्यां - द्योतमानं सूर्यं द्युलोकं वा, अस्तभायत् –अस्तभ्नात्। अस्तभ्नात् नाम इन्द्रः अनवलंबनस्य तस्य अवस्थापनम् अकुरुत इत्यर्थः । बृहन्तं - महदंतरिक्षं रोदसी द्यावापृथिव्यौ च अपृणत्,अर्थात् - स्वतेजसा पूरणं कृतवान् । किञ्च स इन्द्रः पृथिवीं विस्तीर्णां भूमिं अधारयत्  एनां भूमिमप्रथयत् च ॥ सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् ॥२।।

**<u>व्याकरणविशेषाः</u>**

**स्तंभु** इति सौत्रो धातुः क्र्यादिः । लङि व्यत्ययो बहुलमित्यहावपि शायजादेशः

प्रथ प्रख्याने । स्यंतस्स लुङि चङि रूपं । चङ्यन्यतरस्यामिति मध्योदात्तत्वं ॥

**<u>तृतीयमन्त्रः</u>**

**सद्मेव प्राचो विमिमाय मानै र्वज्रेण खान्यतृणन्नदीनाम् ।**
**वृथासृजत्पथिभि र्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥३॥**

**पदच्छेदः**

सद्मऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेण । खानि । अतृणत् । नदीनाम् ।

वृथा । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥३

**अन्वयः**

सद्मऽइव। प्राचः। वि। मिमाय। मानैः । वज्रेण। खानि। अतृणत् । नदीनां ।

वृथा। असृजत्। पृथिऽभिः। दीर्घऽयाथैः। सोमस्य। ता। मदे। इंद्रः। चकार ॥३॥

**भावार्थः**

सद्मा इव यथा यज्ञगृहात् षट्त्रिंशत् – प्रक्रम-प्राचीत्येवंरूपैः परिमाणैः प्राक्प्रवणान् कुर्वन्तितद्वत् सिंधून् अलोकान् वा अनृजून् वाप्राङ्मुखान् परिमाणैः इन्द्रःविशेषेण निर्मितवान् । तथा नदीनां निर्गमनद्वाराणि वज्रेणअखनत् ॥तथा बहुकालं गन्तव्यैः मार्गैः अनायासेन ता नदीः सृष्टवान् । सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत्॥३।।

**<u>व्याकरणविशेषाः</u>**

तृदि हिंसानादरयोः । रुधादि । लङ् । तथा च मंत्रः । इंद्रो अस्माँ अरदद्वज्रबाहुः ।३. ३३. ६.। इति

**<u>चतुर्थमन्त्रः</u>**

**स प्रवोळ्हृन्परिगत्य दभीते र्विश्वमधागायुधमिद्धे अग्नौ ।**
**संगोभि रश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥४॥**

**पदच्छेदः**

सः । प्रऽवोळ्हृन् । परिऽगत्य । दभीतेः । विश्वम् । अधाक् । आयुधम् । इद्धे । अग्नौ ।

सम् । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥४

**अन्वयः**

सः । प्रऽवोळ्हृन्। परिऽगत्य। दभीतेः । विश्वं । अधाक् । आयुधं । इद्धे । अग्नौ ।

सं। गोभिः। अश्वै । असृजत् । रथेभिः। सोमस्य। ता। मदे । इंद्रः । चकार ॥ ४ ॥

**भावार्थः**

प्राक् खलु चुमुः – इधुनिप्रभृतयोये असुराःदभीतिनामकराजर्षेः पुरं संरुध्य परिगृह्य तस्मात्पुरात् निर्गताः इति एका कथा ।स इंद्रः दभीतेः प्रवोढृन् ॥ प्रकर्षेण तं दभीतिं वहतस्तानसुरान् मध्ये मार्गं परिगत्य तेषां सर्वमायुधम् दीप्यमाने वह्नौ अधाक् । पश्चात् तं दभीतिं गोभिरश्वैः रथैश्च सम्यक् योजितवान् । सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् ॥४।।

**व्याकरणविशेषाः**

सहिवहोरोदवर्णस्येत्योत्वं।अधाक् - अधाक्षीत्॥ दहेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक् ॥

**<u>पञ्चममन्त्रः</u>**

**स ईं महीं धुनिमेतो ररम्णात्सो अस्नातृनपारयत्स्वस्ति ।**
**त उत्स्नाय रयिमभिप्रतस्थुः सोमस्य ता मद इन्द्रश्चकार ॥५॥**

**पदच्छेदः**

सः । ईम् । महीम् । धुनिम् । एतोः । अरम्णात् । सः । अस्नातृन् । अपारयत् । स्वस्ति ।

ते । उत्ऽस्नाय । रयिम् । अभि । प्र । तस्थुः । सोमस्य । ता । मदे । इन्द्रः । चकार ॥५

**अन्वयः**

सः। ई। महीं। धुनिं। एतोः । अरम्णात्। सः । अस्नातृन्। अपारयत् । स्वस्ति । ते। उत्ऽस्नाय। रयिं । अभि। प्र। तस्थुः । सोमस्य । ता। मदे। इंद्रः । चकार ॥५॥

**भावार्थः**

इन्द्रः एनां महतीं नदीं ऋषीणां गमनार्थम् उपाशमयत् । महाजलां नदीमल्पोदकाम् कृतवान् । ततःइंद्रः स्नातुमशक्तान् तरणासमर्थान् ऋषीन् क्षेमेण अपारयत् । ते महर्षय तां नदीमुत्तीर्य यं ऐश्वर्यमपेक्ष्य गच्छन्ति तं रयिमभिलक्ष्य प्रतस्थिरे। सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् ॥ ॥५॥

**व्याकरणविशेषाः**

धुनिं - धुनोति स्तोतृणां पापानीति धुनिः परुष्णी नदी ईश्वरपदासंनिधानेऽपि तोसुन्प्रत्ययः । पा°३. ४.१३. ॥

**षष्ठमन्त्रः**

**सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः संपिपेष ।**

**अजवसो जविनीभि र्विवृश्चन्सोमस्य ता मद इन्द्रश्चकार ॥६॥**

**पदच्छेदः**

सः । उदञ्चम् । सिन्धुम् । अरिणात् । महिऽत्वा । वज्रेण । अनः । उषसः । सम् । पिपेष ।

अजवसः । जविनीभिः । विऽवृश्चन् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥६

**अन्वयः**

सः। उदंचं । सिंधु । अरिणात् । महिऽत्वा। वज्रेण । अनः । उषसः। सं । पिपेष।

अजवसः । जविनीभिः । विऽवृश्चन् । सोमस्य । ता। मदे । इंद्रः । चकार ॥६॥

**भावार्थः**

स इन्द्रः प्रांचं संतं स्वकीयेन महिम्ना उदङ्मुखम् अकुरुत । उषानामकदेव्या शकटं वज्रेण चूर्णीकृतवान् । दुर्बलाः सेना जवयुक्ताभिः सेनाभिः विशेषेण भिंदन् पिपेष । सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् ।६।।

**व्याकरणविशेषाः**

सिंधुशब्दश्छंदसि पुल्लिंगः,विऽवृश्चन् -ओव्रश्चू छेदने, शतरि ग्रहिज्यादिना संप्रसारणं ।

**<u>सप्तममन्त्रः</u>**

**स विद्वाँ अपगोहं कनीना माविर्भवन्नुदतिष्ठत्परावृक् ।**
**प्रतिश्रोणस्थाद्व्यनगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥७॥**

**पदच्छेदः**

सः । विद्वान् । अपऽगोहम् । कनीनाम् । आविः । भवन् । उत् । अतिष्ठत् । पराऽवृक् ।

प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे । इन्द्रः । चकार ॥७

**अन्वयः**

सः । विद्वान् । अपऽगोहं । कनीनां आविः । भवन्। उत्। अतिष्ठत् । पराऽवृक्।

प्रति। श्रोणः। स्थात्।वि। अनक्। अचष्ट । सोमस्य। ता। मदे । इंद्रः। चकार ॥ ७॥

**भावार्थः**

पुरा खलु काश्चित् कन्यकाश्चक्षुर्हीनं पादहीनं परावृजं जिघृक्षुमृषिं दृष्ट्वा अभिदुद्रुवुः । ततः स ऋषिः इन्द्रं स्तुत्वा चक्षुः पादं च लेभे तद्वृत्तान्तमाह अस्मिन्मन्त्रे । कन्यकानां तिरोभावं विद्वान् परावृक् ऋषिः सर्वेषां प्रत्यक्षो भवन् उदतिष्ठत् । श्रोणः - पूर्वं पंगुः इदानीम् इन्द्रस्य प्रसादात् विभग्नजानुः ताः कन्याः प्रति स्थितवान् । पूर्वम् अन्धोऽधुना चक्षुर्लाभात् ताः कन्यका विशेषेण पश्यति स्म । सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् ॥७।।

**<u>अष्टममन्त्रः</u>**

**भिनद्वलमङ्गिरोभि गृणानो विपर्वतस्य दृंहितान्यैरत् ।**
**रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥८॥**

**पदच्छेदः**

भि॒नत् । व॒लम् । अङ्गि॑रःऽभिः । गृ॒णा॒नः । वि । पर्व॑तस्य । दृं॒हि॒तानि॑ । ऐ॒र॒त् ।

रि॒णक् । रोधां॑सि । कृ॒त्रिमा॑णि । ए॒षा॒म् । सोम॑स्य । ता । मदे॑ । इन्द्रः॑ । च॒का॒र ॥८

**अन्वयः**

भिनत्। वलं। अंगिरःऽभिः । गृणानः । वि। पर्वतस्य। दृंहितानि। ऐरत् ।

रिणक् । रोधांसि। कृत्रिमाणि । एषां । सोमस्य । ता । मदे । इंद्रः। चकार ॥८॥

**भावार्थः**

अंगिरोभिर्गृणानः स्तूयमानः स इंद्रो वलनामकमसुरं अभिनत् । तथा गवां निरोधकस्य पर्वतस्य शिलाभिर्दृढीकृतानि द्वाराणि उद्घाटितवान् तद्वृतान्तमाह अस्मिन्मन्त्रे । पर्वतानां क्रियया निर्वृतानि निरुद्धानि द्वाराणि उदघाटयत् । सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् । ।८।।

**नवममन्त्रः**

**स्वप्नेनाभ्युप्या चुमुरिंधुनिं च जघन्थ दस्युं प्रदभीतिमावः ।**
**रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥९॥**

**पदच्छेदः**

स्वप्नेन । अभिऽउप्य । चुमुरिम् । धुनिम् । च । जघन्थ । दस्युम् । प्र । दभीतिम् । आवः ।रम्भी । चित् । अत्र । विविदे । हिरण्यम् । सोमस्य । ता । मदे । इन्द्रः । चकार ॥९

**अन्वयः**

स्वप्नेन । अभिऽउप्य । चुमुरि। धुनिं । च । जघंथ। दस्युं । प्र। दभीतिं । आवः ।रंभी। चित् । अत्र । विविदे । हिरण्यं । सोमस्य । ता । मदे । इंद्रः । चकार ॥९॥

**भावार्थः**

स त्वं दस्युं सर्वस्योपक्षपयितारं चुमुरिं धुनिं च दीर्घनिद्रया संयोज्य हतवानसि । ततस्ताभ्यां युध्यमानं दभीतिं राजर्षिं रक्षितवानसि । तथा च वेत्रधारी चास्य दौवारिकोऽस्मिन्युद्धे तयोरसुरयोः धनं लेभे । सोमस्य हर्षे संजाते सति तानि इमानि कर्माणि इन्द्रः अकरोत् । ।९।।

**व्याकरणविशेषाः**

आवः- अवतेः रक्षणार्थस्य लङि सिपि रूपं । विविदे- विद्लृ लाभे स्वरितेत् ।

**दशममन्त्रः**

**नूनं सा ते प्रतिवरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।**
**शिक्षा स्तोतृभ्यो मातिधग्भगो नो बृहद्वदेम विदथे सुवीराः ॥१०॥**

**पदच्छेदः**

नूनम् । सा । ते । प्रति । वरम् । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी ।शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥१०

**अन्वयः**

नूनं । सा । ते । प्रति। वरं। जरित्रे। दुहीयत् । इंद्र। दक्षिणा। मघोनी।

शिक्ष। स्तोतृऽभ्यः। मा। अति।धक्। भगः।नः।बृहत्। वदेम। विदथे। सुवीराः ॥१०॥

**भावार्थः**

हे इंद्र या दक्षिणा स्तोतृभ्यो देया ते त्वत्संबंधिनी मघोनी स्तोत्रे श्रेष्ठमभिमतमर्थं नूनं प्रतिदुहीयत्, तादृशीं दक्षिणां स्तोतृभ्योऽस्मभ्यं प्रयच्छ । किंच भगो भजनीयस्त्वं प्रथममस्मभ्यं दत्वा पश्चादन्येभ्यो दीयतामित्यर्थः । यद्वा नोऽस्माकं कामान् मा धाक्षीः। अपेक्षितफलदानेन पूरयेत्यर्थः । शोभनपुत्रपौत्राः संतो वयं विदथे ऽस्मिन्यज्ञे प्रभूतं स्तोत्रंत्वामुद्दिश्य ब्रवाम ।

**व्याकरणविशेषाः**

दक्षिणा - दक्षमुत्साहनं करोतीति दक्षिणा, धक्- दहेर्दानार्थस्य लुङि मंत्रे घसेत्यादिना च्लेर्लुक् ॥

# अश्विनीसूक्तम्

**प्रथममन्त्रः**

**अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ।**

**पुरुभुजा चनस्यतं ॥१**

**पदच्छेदः**

अश्विना । यज्वरीः । इषः । द्रवत्पाणी इति द्रवत्ऽपाणी । शुभः । पती इति ।पुरुऽभुजा । चनस्यतम् ॥१

**अन्वयः**

अश्विना । यज्वरीः । इषः । द्रवत्पाणी इति द्रवत्ऽपाणी । शुभः । पती इति ।पुरुऽभुजा । चनस्यतम् ॥१

**भावार्थः**

हे अश्विनौ युवाम् हविर्लक्षणान्यन्नानि इच्छतं भुञ्जाथाम् । कीदृशावश्विनौ इति चेत् - हविर्ग्रहणाय द्रवद्भ्यां पाणिभ्यामुपेतौ, शोभनकर्मणः पालकौ, विस्तीर्णभुजौ च विवक्षितौ ।

**द्वितीयमन्त्रः**

**अश्विना पुरुदंससा नरा शवीरया धिया ।**

**धिष्ण्या वनतं गिरः ॥ २**

**पदच्छेदः**

अश्विना । पुरुऽदंससा । नरा । शवीरया । धिया ।धिष्ण्या । वनतम् । गिरः ॥२

**अन्वयः**

अश्विना । पुरुऽदंससा । नरा । शवीरया । धिया ।धिष्ण्या । वनतम् । गिरः ॥२

**भावार्थः**

हे अश्विनौ युवांअस्मदीयाः स्तुतीः आदरयुक्त्या बुद्ध्या संभजतं स्वीकुरुतम् । कीदृशावश्विनौ इति चेत् । बहुकर्माणौ नेतारौ धार्ष्ट्ययुक्तौ बुद्धिमन्तौ वा ग्राह्यौ । कीदृश्या धिया इति चेत्- गतियुक्त्या अप्रतिहतप्रसरया इति भावः ।

**तृतीयमन्त्रः**

**दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः ।**

**आ यातं रुद्रवर्तनी ॥३**

**पदच्छेदः**

दस्रा । युवाकवः । सुताः । नासत्या । वृक्तऽबर्हिषः ।आ । यातम् । रुद्रवर्तनी इति
रुद्रऽवर्तनी ॥३

**अन्वयः**

दस्रा । युवाकवः । सुताः । नासत्या । वृक्तऽबर्हिषः ।आ । यातम् । रुद्रवर्तनी इति
रुद्रऽवर्तनी ॥३

**भावार्थः**

हे अश्विनौ अस्मिन् कर्मण्यागच्छतम् । किमर्थमिति तदुच्यते । युष्मदर्थं सोमा अभिषुताः तान् स्वीकर्तुमिति । कीदृशावश्विनौइति चेत्- दस्रौ शत्रूणामुपक्षपयितारौ

असत्यमनृतभाषणरहितौ । रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्तनिर्मार्गो धाटीरूपो ययोस्तौ रुद्रवर्तनी तादृशौ अश्विनौ विवाक्षितौ।

**चतुर्थमन्त्रः**

**इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।**

**अण्वीभिस्तना पूतासः ॥४**

**पदच्छेदः**

इन्द्र । आ । याहि । चित्रभानो इति चित्रऽभानो । सुताः । इमे । त्वाऽयवः ।अण्वीभिः । तना । पूतासः ॥४ ।।

**अन्वयः**

इन्द्र । आ । याहि । चित्रभानो इति चित्रऽभानो । सुताः । इमे । त्वाऽयवः ।अण्वीभिः । तना । पूतासः ॥४।।

**भावार्थः**

चित्रदीप्ते हे चित्रदीप्ते इन्द्र अस्मिन् कर्मणि आगच्छ । ऋत्विजामङ्गुलिभिः अभिषुताः इमे सोमाः त्वां कामयमाना वर्तन्ते । किंच एते सोमाः नित्यं पूताः वर्तन्ते।

**पञ्चममन्त्रः**

**इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।**

**उप ब्रह्माणि वाघतः ॥५**

**पदच्छेदः**

इन्द्र । आ । याहि । धिया । इषितः । विप्रऽजूतः । सुतऽवतः ।उप । ब्रह्माणि । वाघतः ॥५

**अन्वयः**

इन्द्र । आ । याहि । धिया । इषितः । विप्रऽजूतः । सुतऽवतः ।उप । ब्रह्माणि । वाघतः ॥५

**भावार्थः**

हे इन्द्र त्वम् अस्मिन् कर्मण्यागच्छ। किमर्थमिति चेत् – ऋत्विजःवेदरूपाणि स्तोत्राण्युपैतुम्, कीदृशस्त्वमायाति इतिचेत्- अस्मदीयया प्रज्ञया प्राप्तः इति भावः । कीदृशस्य ऋत्विजिःइति चेत्- अभिषुतसोमयुक्तस्य इति शेषः॥

**षष्ठमन्त्रः**

**इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।**

**सुते दधिष्व नश्चनः ॥६**

**पदच्छेदः**

इन्द्र । आ । याहि । तूतुजानः । उप । ब्रह्माणि । हरिऽवः ।सुते । दधिष्व । नः । चनः ॥६

**अन्वयः**

इन्द्र । आ । याहि । तूतुजानः । उप । ब्रह्माणि । हरिऽवः ।सुते । दधिष्व । नः । चनः ॥६

**भावार्थः**

हे अश्वयुक्तेन्द्र त्वं ब्रह्माणि उपैतुम् आ याहि। कीदृशस्त्वमिति चेत्- त्वरमाणः ग्राह्यः। आगत्य च अस्मिन् सोमाभिषवयुक्ते कर्मणि अस्मदीयं अन्नं हविर्लक्षणं स्वीकुरु ॥

**सप्तममन्त्रः**

**ओमा॑सश्चर्षणीधृतो॒ विश्वे॑ देवास॒ आ ग॑त ।**

**दा॒श्वांसो॑ दा॒शुषः॑ सु॒तं ॥७**

**पदच्छेदः**

ओमा॑सः । च॒र्ष॒णि॒ऽधृ॒तः॒ । विश्वे॑ । दे॒वा॒सः॒ । आ । ग॒त ।दा॒श्वांसः॑ । दा॒शुषः॑ । सु॒तम् ॥७

**अन्वयः**

ओमासः । चर्षणिऽधृतः । विश्वे । देवासः । आ । गत ।दाश्वांसः । दाशुषः । सुतम् ॥७

**भावार्थः**

हे विश्वे देवाः हविर्दत्तवतो यजमानस्य अभिषुतं सोमं प्रतिआगच्छत । ते च देवाः रक्षकाः मनुष्याणां धारकाः  फलस्य दातारः ।

**<u>अष्टममन्त्रः</u>**

**विश्वे॑ दे॒वासो॑ अ॒प्तुरः॑ सु॒तमा ग॑न्त॒ तूर्ण॑यः ।**

**उ॒स्रा इ॑व॒ स्वस॑राणि ॥८**

**पदच्छेदः**

विश्वे॑ । दे॒वासः॑ । अ॒प्ऽतु॒रः॑ । सु॒तम् । आ । ग॒न्त॒ । तूर्ण॑यः ।उ॒स्राःऽइ॑व । स्वस॑राणि ॥८

**अन्वयः**

विश्वे । देवासः । अप्ऽतुरः । सुतम् । आ । गन्त । तूर्णयः ।उस्राःऽइव । स्वसराणि ॥८

**भावार्थः**

“विश्वेदेवाः सोमम् आगच्छन्तु । कीदृशाः ते - तत्तत्काले वृष्टिप्रदा, त्वरायुक्ताः सूर्यरश्मयः इव अहानि प्रति आलस्यरहिता यथा समागच्छन्ति तद्वत् यजमानमनुग्रहीतुमालस्यरहिता इति भावाः।

**नवममन्त्रः**

**विश्वे देवासो अस्रिध एहिमायासो अद्रुहः ।**

**मेधं जुषंत वह्नयः ॥९**

**पदच्छेदः**

विश्वे । देवासः । अस्रिधः । एहिऽमायासः । अद्रुहः ।मेधम् । जुषन्त । वह्नयः ॥९

**अन्वयः**

विश्वे । देवासः । अस्रिधः । एहिऽमायासः । अद्रुहः ।मेधम् । जुषन्त । वह्नयः ॥९

**भावार्थः**

विश्वेदेवाः मेधं हविर्यज्ञसंबद्धं सेवन्ताम् । कीदृशाः ते-  क्षयरहिताः, सर्वतो व्याप्तप्रज्ञाः, द्रोहरहिताः वोढारो धनानां प्रापयितारः ग्राह्यः॥

**दशममन्त्रः**

**पावका नः सरस्वती वाजेभिर्वाजिनीवती ।**

**यज्ञं वष्टु धियावसुः ॥१०**

**पदच्छेदः**

पावका । नः । सरस्वती । वाजेभिः । वाजिनीऽवती ।यज्ञम् । वष्टु । धियाऽवसुः ॥१०

**अन्वयः**

पावका । नः । सरस्वती । वाजेभिः । वाजिनीऽवती ।यज्ञम् । वष्टु । धियाऽवसुः ॥१०

**भावार्थः**

हे सरस्वति देवि यजमानेभ्यो दातव्यैरन्नैर्निमित्तभूतैः अस्मदीयं यज्ञं कामयताम् । कीदृशी सरस्वती सा ।शोधयित्री ,अन्नवत्क्रियावती कर्मप्राप्यधननिमित्तभूता च।

**एकादशमन्त्रः**

**चोदयित्री सूनृतानां चेतन्ती सुमतीनां ।**

**यज्ञं दधे सरस्वती ॥११**

**पदच्छेदः**

चोदयित्री । सूनृतानाम् । चेतन्ती । सुऽमतीनाम् ।यज्ञम् । दधे । सरस्वती ॥११

**अन्वयः**

चोदयित्री । सूनृतानाम् । चेतन्ती । सुऽमतीनाम् ।यज्ञम् । दधे । सरस्वती ॥११

**भावार्थः**

सरस्वती इमं यज्ञं धारितवती । कीदृशी सा-  प्रियाणां सत्यवाक्यानां प्रेरयित्री,शोभनबुद्धियुक्ताना-मनुष्ठातृणां तदीयमनुष्ठेयं ज्ञापयन्ती ग्राह्या॥

**द्वादशमन्त्रः**

**महो अर्णः सरस्वती प्र चेतयति केतुना ।**

**धियो विश्वा वि राजति ॥१२**

**पदच्छेदः**

म॒हः । अर्णः॑ । सर॑स्वती । प्र । चे॒त॒य॒ति॒ । के॒तुना॑ ।धियः॑ । विश्वाः॑ । वि । रा॒ज॒ति॒ ॥१२

**अन्वयः**

महः । अर्णः । सरस्वती । प्र । चेतयति । केतुना ।धियः । विश्वाः । वि । राजति ॥१२

**भावार्थः**

द्विविधा हि सरस्वती विग्रहवद्देवता नदीरूपा च । तत्र पूर्वाभ्यामृग्भ्यां विग्रहवती प्रतिपादिता । अनया तु नदीरूपा प्रतिपाद्यते। तादृशी सरस्वती कर्मणा प्रवाहरूपेण प्रभूतमुदकं प्रकर्षेण ज्ञापयति । किं च स्वकीयेन देवतारूपेण धियः सर्वाण्यनुष्ठातृप्रज्ञानानि विशेषेण दीपयति । अनुष्ठानविषया बुद्धीः सर्वदोत्पादयतीत्यर्थः ।

# सोमसूक्तम्

**<u>सोमसूक्तस्य प्रथममन्त्रस्य पाठः-</u>**

सोमस्य धारा पवते नृचक्षस ऋतेन देवान् हवते दिवस्परि ।

बृहस्पते रथेना वि दिद्युते समुद्रासो न सवनानि विव्यधुः ॥ १ ॥

**सोमसूक्तस्य प्रथममन्त्रस्य पदपाठः-**

सोमस्य। धारा। पवते। नृऽचक्षसः । ऋतेन। देवान्। हवते। दिवः। परि।बृहस्पतेः। रवथेन। वि। दिद्युते। समुद्रासः। न। सवनानि। विव्यचुः॥१॥

**सोमसूक्तस्य प्रथममन्त्रस्य अन्वयः-**

नृचक्षसः सोमस्य धारा पवते ऋतेन दिवः परि देवान् हवते बृहस्पतेः रवथेन वि दिद्युते समुद्रासः न सवनानि विव्यचुः ।

**सोमसूक्तस्य प्रथममन्त्रस्य भावार्थः-**

मनुष्याणां यजमानानाम् अध्वर्य्वादिवृत्विजां द्रष्टुः सोमस्य धारा श्चोतते, यद्वासोमस्य धारा ग्रहपात्रेषु गच्छति, स्वकीये कर्मणि प्रवर्तते। यज्ञेन द्युलोकस्य उपरि वर्तमानान् सोमभाजः इन्द्रादीन् हवते। यद्वा मन्त्रपालकस्य स्तोतुः शब्देन सह विद्योतते । समुद्रा इव पृथिवीं यज्ञसंबन्धीनि सवनानि आप्नुवन्ति। यद्वा यदा बृहस्पतिः शब्दं करोति तेनानेन सोमेन व्याप्तानि सवनानि यज्ञं व्याप्नुवन्ति, उदधयः इव पृथिवीमिति ।

**व्याकरणविशेषाः**

बृहस्पतेः - बृहतः पातुर्वा पालयितुः वा

**<u>सोमसूक्तस्य द्वितीयमन्त्रस्य पाठ :-</u>**

यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन् महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥ २ ॥

**सोमसूक्तस्य द्वितीयमन्त्रस्य पदपाठः-**

यम्। त्वा। वाजिन्। अघ्न्याः । अभि । अनूषत । अय: ऽहतम् । योनिम् । आ। रोहसि। द्युऽमान्।।मघोनाम्। आयुः। प्रऽतिरन् । महि । श्रवः । इन्द्राय । सोम । पवसे । वृषा । मदः।।२।।

**सोमसूक्तस्य द्वितीयमन्त्रस्य अन्वयः-**

वाजिन् यं त्वा अघ्न्याः अभि अनूषत अयोहतं योनिं द्युमान् आ रोहसि सोम मघोनाम् आयुः महि श्रवः प्रतिरन् इन्द्राय वृषा मदः पवसे ।

**सोमसूक्तस्य द्वितीयमन्त्रस्य भावार्थ: -**

हे अन्नवन्! बलवन्वा सोम! यं त्वाम् अहननीयाः गावः अभिस्तुवन्ति, गोवधस्य उपपातकत्वात् हन्तुम् अयोग्याः गावः तस्मात् अघ्न्याः उच्यन्ते। त्वयि यज्ञे आगते सति आशिरार्थं स्थिताः गावः शब्दं कुर्वन्ति । यद्वा अहन्तव्या ब्राह्मणाः अघ्न्याः, सोमे राज्ञि यज्ञे आगते सति सोमस्य राज्ञः आदरार्थम् आतिथ्येष्टिः भवति, तत्र ब्राह्मणाः मंत्रोच्चारणेन सोमस्य राज्ञः स्वागतं कुर्वन्ति। ईदृश: त्वं हिरण्मयेन पाणिना हतं संस्कृतं स्थानं दीप्तिमान् सन् आरोहसि। हे सोम! त्वं हविष्मताम् आयुष्यं महदन्नं यशो वा वर्धयन् इन्द्राय वर्षिता मदकरश्च पूयसे ।

**<u>सोमसूक्तस्य तृतीयमन्त्रस्य पाठः-</u>**

एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन् हरिरत्यः स्यन्दते वृषा॥३॥

**सोमसूक्तस्य तृतीयमन्त्रस्य पदपाठः-**

आ। इन्द्रस्य। कुक्षा। पवते । मदिन्ऽतमः । ऊर्जम्। वसानः । श्रवसे । सुमङ्गलः।। |

कर्णम्। वसानः। श्रट सुऽमङ्गलः।। प्रत्यङ्। सः। विश्वा। भुवना। अभि । पप्रथे । क्रीळन् । हरिः । अत्यः । स्यन्दते ।वृषा॥३॥

**सोमसूक्तस्य तृतीयमन्त्रस्य अन्वयः-**

इन्द्रस्य कुक्षा आ पवते श्रवसे मदिन्तमः ऊर्जं वसानः सुमङ्गलः सः प्रत्यङ् विश्वा भुवना अभि पप्रथे क्रीडन् हरिः अत्यः वृषा स्यन्दते ।

**सोमसूक्तस्य तृतीयमन्त्रस्य भावार्थ:-**

अयं सोमः इन्द्रस्य उदरे आर्द्रीक्रियते, इन्द्रः यागेषु सोमं पिबति तस्मात् सोमः इन्द्रस्य प्रियपदार्थः, किमर्थम् इन्द्रस्य उदरे सोमः आर्द्रीक्रियते इति चेत्, उच्यते, यजमानस्य अन्नसिद्ध्यर्थम्। इन्द्रः सोमपानेन तुष्टः सन् यजमानाय अन्नादियज्ञफलं ददाति। मदयितृतमः सोमो बलकरं रसमाच्छादयन् मङ्गलप्रदः भवति सः सोमःपुरस्तात् सर्वाणि भूतजातानि अभिप्रथयति । दिवि उदितः सन् क्रीडन् वेद्यां संक्रीडमानः हरितवर्णः अश्व इव अतनशीलः कामानां वर्षक: सः सोमः रसरूपेण प्रवहति ।

**व्याकरणविशेषाः**

मदः तृप्तिः अस्य अस्तीति मदी, अतिशयेन मदी मदिन्तमः

शोभनं मङ्गलमुदयो यस्य सः सुमङ्गलः

**सोमसूक्तस्य चतुर्थमन्त्रस्य पाठः -**

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान् देवाँ आ पवस्वा सहस्रजित्॥४॥

**सोमसूक्तस्यचतुर्थमन्त्रस्य पदपाठः-**

तम्। त्वा। देवेभ्यः। मधुमत्तमम् । नरः । सहस्रऽधारम् । दुहते। दश । क्षिपः ।।
नृऽभिः । सोम । प्रऽच्युतः । ग्रावऽभिः । सुतः । विश्वान् । देवान्। आ। पवस्व ।

सहस्रऽजित्॥४॥

**सोमसूक्तस्य चतुर्थमन्त्रस्य अन्वयः-**

तं त्वा देवेभ्यः मधुमत्तमं सहस्रधारं नरः दुहते दश क्षिपः सोम नृभिः प्रच्युतः ग्रावभिः सुतः सहस्रजित् विश्वान् देवान् आ पवस्व ।

**सोमसूक्तस्य चतुर्थमन्त्रस्य भावार्थः -**

हे सोम! तादृशं ग्रहपात्रेषु स्थितम्, इन्द्रस्य प्रियम्, अन्नवन्तम्, बलप्रदम्, ब्राह्मणैःअघ्न्याभिः गोभिः स्तुतम्, ब्राह्मणानां राजानम्, इन्द्रस्य उदरे आसिच्यमानम्, मदिन्तमम्, अश्व इव अतनशीलम्, कामानां वर्षकं त्वां मधुच्युतम् इन्द्रादिदेवेभ्यः बहुधारायुक्तं नेतारः अध्वर्य्वादि - ऋत्विजो दोहनं कुर्वन्ति । हे सोम ! मनुष्यैः प्रेरितः, ग्रावभिः अभिषुतः त्वं सहस्रसंख्याकधनस्य जेता, बहुनो वसुनो जेता, सहस्राणां योधानां वा जेता सन् विश्वान् देवान् समन्तात् पवस्व ।

**<u>सोमसूक्तस्य पञ्चममन्त्रस्य पाठः-</u>**

**तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः ।**
**इन्द्रं सोम मादयन् दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥५॥**

**सोमसूक्तस्य पञ्चममन्त्रस्य पदपाठः-**

तम्। त्वा। हस्तिनः। मधुमन्तम् । अद्रिभिः । दुहन्ति । अप्सु । वृषभम्। दश। क्षिपः।।
इन्द्रम्। सोम। मादयन्। दैव्यम्। जनम्। सिन्धोःऽइव। ऊर्मिः। पवमानः। अर्षसि।।५।।

**सोमसूक्तस्य पञ्चममन्त्रस्य अन्वयः-**

तं मधुमन्तं वृषभं त्वा हस्तिन: दश क्षिपः अद्रिभिः अप्सु दुहन्ति सोम इन्द्रं दैव्यं जनं मादयन् सिन्धोः ऊर्मिः इव पवमानः अर्षसि ।

**सोमसूक्तस्य पञ्चममन्त्रस्य भावार्थः -**

हे सोम! तं तादृशं इन्द्रस्य पातुम् अभिषुतम्, अतिशयेन धनानां दातारम्, दातृतमम्, शत्रूणां हन्तारम् , ग्रहपात्रेषु चमसेषु च क्षरणशीलम्, यज्ञानां गोप्तारम्, वसतीवरीभिः अद्भिः संमर्षणशीलम्, वरणीयम्, हरितबभ्रुहिरण्यादिवर्णोपेतं कामानां वर्षकं त्वां सोमं हस्तयुक्ता मनुष्याः दशाङ्गुलयो ग्रावभिः उदकेषु रसं निष्पादयन्ति । तादृश हेसोम! इन्द्रम्, देवसंबन्धिनं जनं संघं वा तर्पयन् नद्याः ऊर्मिरिव पूयमानः सन् गच्छसि ।।

# अग्निसूक्तम्

**प्रथममन्त्रस्य पाठः-**

**अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् ।होता॑रं रत्न॒धात॑मम् ॥१**

**पदच्छेदः**

अ॒ग्निम् । ई॒ळे॒ । पु॒रःऽहि॑तम् । य॒ज्ञस्य॑ । दे॒वम् । ऋ॒त्विज॑म् ।होता॑रम् । र॒त्न॒ऽधात॑मम् ॥१

**अन्वयः**

अग्निम् । ईळे । पुरःऽहितम् । यज्ञस्य । देवम् । ऋत्विजम् ।होतारम् । रत्नऽधातमम् ॥१

**भावार्थः**

अग्निनामकं देवम् ईळे स्तौमि। मन्त्रः होत्रा प्रयोज्यः अतः अहं होता स्तौमि । यथा राज्ञः पुरोहितस्तदभीष्टं संपादयति, तथाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति । यद्वा। “रत्नधातमं - यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा स्तौमि ।।

**द्वितीयमन्त्रस्य पाठः**

**अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त ।स दे॒वाँ एह व॑क्षति ॥२**

**पदच्छेदः**

अ॒ग्निः । पूर्वे॑भिः । ऋषि॑ऽभिः । ईड्यः॑ । नूत॑नैः । उ॒त ।

सः । दे॒वान् । आ । इ॒ह । व॒क्ष॒ति॒ ॥२

**अन्वयः**

अग्निः । पूर्वेभिः । ऋषिऽभिः । ईड्यः । नूतनैः । उत ।

सः । देवान् । आ । इह । वक्षति ॥२

**भावार्थः**

अयम् अग्निः पुरातनैः भृग्वङ्गिरःप्रभृतिभिः ऋषिभिः स्तुत्यः, इदानींतनैरस्माभिरपि स्तुत्यः। सः अग्निः स्तुतः सन् यज्ञे देवान् हविर्भुजः आवहतु इति भावः॥

**तृतीयमन्त्रस्य पाठः-**

**अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ।यशसं वीरवत्तमं ॥३**

**पदच्छेदः**

अग्निना । रयिम् । अश्नवत् । पोषम् । एव । दिवेऽदिवे ।यशसम् । वीरवत्ऽतमम् ॥३

**अन्वयः**

अग्निना । रयिम् । अश्नवत् । पोषम् । एव । दिवेऽदिवे ।यशसम् । वीरवत्ऽतमम् ॥३

**भावार्थः**

योऽयं होत्रा स्तुत्योऽग्निस्तेन अग्निना निमित्तभूतेन यजमानः धनम् प्राप्नोति । कीदृशं धनम् इति चेत्। प्रतिदिनं पुष्यमाणतया वर्धमानमेव, न तु कदाचिदपि क्षीयमाणम् धनम् । दानादिना यशोयुक्तं अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतम् प्राप्नोति ।

**चतुर्थमन्त्रस्य पाठः-**

**अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।स इद्देवेषु गच्छति ॥४**

**पदच्छेदः**

अग्ने । यम् । यज्ञम् । अध्वरम् । विश्वतः । परिऽभूः । असि ।सः । इत् । देवेषु । गच्छति ॥४

**अन्वयः**

अग्ने । यम् । यज्ञम् । अध्वरम् । विश्वतः । परिऽभूः । असि ।सः । इत् । देवेषु । गच्छति ॥४

**भावार्थः**

हे अग्ने त्वं यज्ञं सर्वासुदिक्षु परितः प्राप्तवान् असि स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गे गच्छति ।

**पञ्चममन्त्रस्य पाठः-**

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।देवो देवेभिरा गमत् ॥५

**पदच्छेदः**

अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः ।देवः । देवेभिः । आ । गमत् ॥५

**अन्वयः**

अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः ।देवः । देवेभिः । आ । गमत् ॥५

**भावार्थः**

अयम् अग्निदेवः अन्यैर्देवैर्हविर्भोजिभिः सह अस्मिन् यज्ञे समागच्छतु । कीदृशोऽग्निः इति चेत् । होमनिष्पादकः कविक्रतुः, क्रान्तप्रज्ञः क्रान्तकर्मा वा अनृतरहितःअतिशयेन विविधकीर्तियुक्तः ग्राह्यःसः फलमवश्यं प्रयच्छतीति भावः।

**षष्ठमन्त्रस्य पाठः-**

**यदंग दाशुषे त्वमग्ने भद्रं करिष्यसि ।तवेत्तत्सत्यमंगिरः ॥६**

**पदच्छेदः**

यत् । अङ्ग । दाशुषे । त्वम् । अग्ने । भद्रम् । करिष्यसि ।तव । इत् । तत् । सत्यम् । अङ्गिरः ॥६

**अन्वयः**

यत् । अङ्ग । दाशुषे । त्वम् । अग्ने । भद्रम् । करिष्यसि ।तव । इत् । तत् । सत्यम् । अङ्गिरः ॥६

**भावार्थः**

हे अग्ने त्वं हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यत् भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तत् भद्रं तवैव सुखहेतुः। हे अङ्गिरः अग्ने! यजमानस्य विज्ञादिसंपत्तौ सत्यामुत्तरक्रत्वनुष्ठानेनाग्नेरेव सुखं भवति ।

**<u>सप्तममन्त्रस्य पाठः-</u>**

**उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयं ।नमो भरंत एमसि ॥७**

**पदच्छेदः**

उप । त्वा । अग्ने । दिवेऽदिवे । दोषाऽवस्तः । धिया । वयम् ।नमः । भरन्तः । आ । इमसि ॥७

**अन्वयः**

उप । त्वा । अग्ने । दिवेऽदिवे । दोषाऽवस्तः । धिया । वयम् ।नमः । भरन्तः । आ । इमसि ॥७

**भावार्थः**

हे अग्ने अनुष्ठातारोवयम् प्रतिदिनं रात्रावहनि च बुद्ध्या नमस्कारं संपादयन्तः त्वामागच्छामः ।

**<u>अष्टममन्त्रस्य पाठः-</u>**

**राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।वर्धमानं स्वे दमे ॥८**

**पदच्छेदः**

राजन्तम् । अध्वराणाम् । गोपाम् । ऋतस्य । दीदिविम् ।वर्धमानम् । स्वे । दमे ॥८

**अन्वयः**

राजन्तम् । अध्वराणाम् । गोपाम् । ऋतस्य । दीदिविम् ।वर्धमानम् । स्वे । दमे ॥८

**भावार्थः**

पूर्वमन्त्रे त्वामुपैम इत्यग्निमुद्दिश्योक्तम् । कीदृशं त्वाम् इति चेत् । दीप्यमानम् अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां रक्षकम् सत्यस्यावश्यंभाविनः कर्मफलस्यपौनःपुन्येन भृशं वा द्योतकम् । आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते । स्वकीयगृहे यज्ञशालायां हविर्भिः वर्धमानम् अग्निम् उपैमः इति भावः ।।

**<u>नवममन्त्रस्य पाठः-</u>**

**स नः पितेव सूनवेऽग्ने सूपायनो भव ।सचस्वा नः स्वस्तये ॥९**

**पदच्छेदः**

सः । नः । पिताऽइव । सूनवे । अग्ने । सुऽउपायनः । भव ।सचस्व । नः । स्वस्तये ॥९

**अन्वयः**

सः । नः । पिताऽइव । सूनवे । अग्ने । सुऽउपायनः । भव ।सचस्व । नः । स्वस्तये ॥९

**भावार्थः**

हे अग्ने सः त्वं अस्मदर्थं शोभनप्राप्तियुक्तः भव । तथा अस्माकं विनाशराहित्यर्थं समवेतो भव ।

# वरुणसूक्तम्

**<u>वरुणसूक्तस्य प्रथममंत्रस्य पाठः -</u>**

**प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळहुषे भरस्व ॥**
**य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम्॥१॥**

**वरुणसूक्तस्य प्रथममंत्रस्य पदपाठः-**

प्र। शुन्ध्युवम्। वरुणाय । प्रेष्ठाम्। मतिम् । वसिष्ठ । मीळहुषे । भरस्व।।
यः। ईम्। अर्वाञ्चम्। करते। यजत्रम्। सहस्रऽमघम्। वृषणम्। बृहन्तम्॥१॥

**वरुणसूक्तस्य प्रथममंत्रस्य अन्वयः-**

वसिष्ठ मीळहुषे वरुणाय शुन्ध्युवं प्रेष्ठां मतिं प्र भरस्व यः ईम् अर्वाञ्चं करते यजत्रं सहस्रमघं वृषणं बृहन्तम्।

**वरुणसूक्तस्य प्रथममंत्रस्य भावार्थः -**

ऋषिः अत्र आत्मानमेव प्रत्यक्षीकृत्य स्तुतौ नियोजनं करोति । हे वसिष्ठ ! त्वं सेक्त्रे वरुणाय शोधयित्रीं स्वतः एव शुद्धां प्रियतमां स्तुतिं कथय । यो वरुणः एनं सूर्यम् अस्मदभिमुखम् अन्तरिक्षे करोति, तस्मै वरुणाय स्तुतिं प्रापय ।

**<u>वरुणसूक्तस्य द्वितीयमंत्रस्य पाठः-</u>**

**अधा न्वस्य सन्दृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ॥**
**स्वर्यदश्मन्नधिपा उ अन्धोभि मा वपुर्दृशये निनीयात् ॥ २ ॥**

**वरुणसूक्तस्य द्वितीयमंत्रस्य पदपाठः-**

अध। नु। अस्य। सम्ऽदृशम्। जगन्वान्। अग्नेः। अनीकम्। वरुणस्य। मंसि।।

स्वः। यत्। अश्मन्। अधिऽपाः । ॐ इति। अन्धः। अभि। मा। वपुः। दृशये। निनीयात्॥२॥

**वरुणसूक्तस्य द्वितीयमंत्रस्य अन्वयः -**

अध अस्य वरुणस्य सन्दृशं नु जगन्वान् अग्नेः अनीकं मंसि यत् स्वः अश्मन् अन्धः अधिपाः मा दृशये वपुः अभि निनीयात् उ।

**वरुणसूक्तस्य द्वितीयमंत्रस्य भावार्थः-**

इदानीं अस्य वरुणस्य संदर्शनं शीघ्रं गतवान्, अहम् अग्नेः ज्वालालक्षणं सामिधेनीभिः स्तोत्रं करोमि, तं वरुणं यष्टुम् स्तोत्रं करोमि । यदा वरुणः मङ्गलकरम् सोमलक्षणमधिपाता भवति, तदानीं मम दर्शनाय आत्मीयं रूपम् अभिप्रापनं कुर्यात् ।

**<u>वरुणसूक्तस्य तृतीयमंत्रस्य पाठ :-</u>**

**आ यद् रुहाव वरुणश्च नावं प्र यत् समुद्रमीरयाव मध्यम् ॥**
**अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ३ ॥**

**वरुणसूक्तस्य तृतीयमंत्रस्य पदपाठः -**

आ। यत्। रुहाव। वरुणः । च । नावम्। प्र । यत्। समुद्रम् । ईरयाव । मध्यम्।। अधि। यत्। अपाम्। स्नुऽभिः । चराव। प्र । प्रऽईङ्खे। ईङ्ङ्ख्यावहै। शुभे । कम्॥३॥

**वरुणसूक्तस्य तृतीयमंत्रस्य अन्वयः-**

यत् वरुणः च नावम् आरुहाव समुद्रं मध्यं प्र ईरयाव यत् अपां स्नुभिः अधि चराव प्रेङ्खे शुभे कं प्रेङ्ङ्ख्यावहै।

**वरुणसूक्तस्य तृतीयमंत्रस्य भावार्थः-**

यदा वरुणे प्रसन्ने सति अहं वरुणश्च द्वावपि तरणसाधनभूतां नौकां आरूढौ अभवाव, आरोहानन्तरं च वां तां च नावं यदा समुद्रमध्यस्थानम् उपरि गन्त्रीभिः अन्याभिः अपि नौभिः वर्तावहै। आवां तदानीं शोभार्थं नौरूपायां दोलायामेव ऊर्मिभिः इतस्ततः प्रविचलन्तौ

आनन्दं यथा भवति तथा संक्रीडावहै।

**<u>वरुणसूक्तस्य चतुर्थमंत्रस्य पाठः-</u>**

**वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ॥**
**स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः॥४॥**

**वरुणसूक्तस्य चतुर्थमंत्रस्य पदपाठः -**

वसिष्ठम्। ह। वरुणः। नावि। आ । अधात्। ऋषिम् । चकार । सुऽअपाः । महः ऽभिः ।।
स्तोतारम्। विप्रः। सुदिनऽत्वे। अह्नाम्। यात्। नु। द्यावः। ततनन्। यात। उषसः।।४।।

**वरुणसूक्तस्य चतुर्थमंत्रस्य अन्वयः-**

वरुणः ह वसिष्ठं नावि आ अधात् ऋषिं महोभिः स्वपाः चकार विप्रः अह्नां सुदिनत्वे स्तोतारं द्यावः यात् उषसः यात् नु ततनन्।

**वरुणसूक्तस्य चतुर्थमंत्रस्य भावार्थः-**

वरुणः वसिष्ठं स्वकीयां नौकायां आरोहयत् । तथा वरुणः तम् ऋषिं तेजोभिः स्तुतिकर्तारं शोभनकर्माणं चकार। अपि च मेधावी वरुणः सुदिनानि अहानि अस्मै चकार । वरुणो दिवसानां मध्ये सुदिनत्वे यत्फलत्वेन शोभनदिनत्वं तत्र स्तुतिकर्तारम् स्थापितवान् यातो दिवसान् यातीः उषसोपलक्षिता रात्रीः च क्षिप्रं सूर्यात्मना विस्तारयन् ।

**<u>वरुणसूक्तस्य पञ्चममंत्रस्य पाठः-</u>**

**क्व त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ॥**
**बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते॥५॥**

**वरुणसूक्तस्य पञ्चममंत्रस्य पदपाठः-**

क्व। त्यानि। नौ। सख्या। बभूवुः। सचावहे इति। यत्। अवृकम्। पुरा। चित्।। बृहन्तम्।

मानम्। वरुण । स्वधाऽवः । सहस्र द्वारम् । जगम । गृहम् । ते।।५॥

**वरुणसूक्तस्य पञ्चममंत्रस्य अन्वयः-**

वरुण क्व त्यानि नौ सख्या बभूवुः पुरा यत् अवृकं सचावहे चित् स्वधावः ते गृहं जगम बृहन्तं मानं सहस्रद्वारम् ।

**वरुणसूक्तस्य पञ्चममंत्रस्य भावार्थः -**

हे वरुण! क्व तानि आवयोः सख्यानि अभवन् इति वरुणमपश्यन्नाह - पूर्वकालस्य स्तेनवर्जितम् आत्यन्तिकं यत्सख्यम् अस्ति तदावां सेवावहे। किञ्च हे! वरुण! त्वदीयं महान्तं, सर्वभूतजातस्य परिच्छेदकं बहुद्वारं च गृहं गच्छानि।

<u>**वरुणसूक्तस्य षष्ठमंत्रस्य पाठः -**</u>

**य आपिर्नित्यो वरुण प्रियः सन् त्वामागांसि कृणवत् सखा ते।**
**मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ॥६॥**

**वरुणसूक्तस्य षष्ठमंत्रस्य पदपाठः-**

यः। आपिः। नित्यः। वरुण। प्रियः। सन्। त्वाम्। आगांसि। कृणवत्। सखा । ते।। मा। ते। एनस्वन्तः। यक्षिन् । भुजेम । यन्धि । स्म । विप्रः । स्तुवते । वरूथम्॥६॥

**वरुणसूक्तस्य षष्ठमंत्रस्य अन्वयः-**

वरुण यः नित्यः आपिः प्रियः सन् त्वाम् आगांसि कृणवत् ते सखा यक्षिन् ते एनस्वन्तः मा भुजेम मेधावी स्तुवते वरूथं यन्धि स्म ।

**वरुणसूक्तस्य षष्ठमंत्रस्य भावार्थः -**

हे वरुण! यो वसिष्ठः नित्यो ज्ञातिः, यः पूर्वं प्रियः सन् तव अनिष्टानि अकरोत्, सः तव प्रियः अस्तु। हे पूजावन् वरुण! तव स्वभूताः वयं पापफलं मा भुञ्ज्महि। वयं त्वत्प्रसादात् पापरहिताः भवेम। मेधावी त्वं च स्तोत्रं कुर्वते वसिष्ठाय ध्रुवं गृहं प्रयच्छ।

<u>**वरुणसूक्तस्य सप्तममंत्रस्य पाठः -**</u>

**ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्यस्मत् पाशं वरुणो मुमोचत् ।**
**अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः॥**

**वरुणसूक्तस्य सप्तममंत्रस्य पदपाठः-**

ध्रुवासु। त्वा। आसु । क्षितिषु । क्षियन्तः । वि । अस्मत् । पाशम् । वरुणः । मुमोचत् ।।
अवः। वन्वानाः। अदितेः। उपऽस्थात् । यूयम्। पात । स्वस्तिभिः । सदा । नः।।७।।

**वरुणसूक्तस्य सप्तममंत्रस्य अन्वयः-**

ध्रुवासु आसु क्षितिषु क्षियन्तः वरुण त्वा अस्मत् पाशं वि मुमोचत् अदितेः उपस्थात् अवः वन्वानाः यूयं स्वस्तिभिः सदा नः पात।

**वरुणसूक्तस्य सप्तममंत्रस्य भावार्थः -**

हे वरुण! नित्यासु आसु परिदृश्यमानासु कासुचित् भूमिषु निवसन्तो वयं । त्वां स्तोत्रं कुर्मः। सः वरुणः अस्मात् पापं विमुमोक्तुं तथा अखण्डायाः पृथिव्याः उपस्थानात्वरुणेन दत्तं रक्षणं संभजमानाः वयं भवेम । हे वरुण! त्वम् अविनाशैः सर्वदा अस्मान् रक्षत।

## <u>सारांशः</u>

इन्द्रसूक्ते अभिषुतस्य सोमस्य इन्द्रस्य प्रीतिविषयत्वं स्थापितं भवति प्रतिमन्त्रं **सोमस्यतामदइन्द्रश्चकार**इतिश्रवणात्।तत्र अनेकाः कथाः अपि प्रतिपादिताः सन्ति ।तेन वेदकालस्यापि ज्ञानं प्राप्तुं शक्यते अस्माभिः । एवमेव अश्विनीसूक्ते अश्विनीदेवतयोः विषये प्रबन्धः विद्यते । तथा विश्वेदेवनामकदेवानामपि कीर्रतनं दृश्यते । अनन्तरं सरस्वतीदेव्याः मन्त्राः पठिताः । पूजायां इमे मन्त्राः उपयुज्यन्ते इति तस्य लाभः । सोमसूक्ते राज्ञः सोमस्य कीर्तनं वर्तते । अभिषुतस्य सोमस्य प्रयोजनानि च तत्र उक्तानि । अग्निसूक्ते अग्निदेवतायाः कीद्रुशफलप्रदत्वमिति विज्ञायते ।इदमेव वेदस्य प्रथमं सूक्तं

भवति वेदस्य इति तद्विशेषोपि ज्ञातुं शक्यते । वरुणसूक्ते वरुणदेवतायाः वर्णनं द्रष्टुं शक्यते । वरुणजपादिषु तत्प्रयोगस्यापि महत्वं ज्ञातुं शक्यते ।

**बोधप्रश्नाः**

1. इन्द्रसूक्तेकतिमन्त्राःसन्ति?
2. कस्यअभिषवनंकर्तव्यम्?
3. सरस्वतीमन्त्रःकस्मिन्सूक्तेविद्यते?
4. अग्निसूक्तस्यप्रथममन्त्रःकः?
5. वरुणसूक्तेकतिमन्त्राःसन्ति?

**शब्दावली**

1.विविदे

2.उषसः

3. अस्रिधः

4. चित्रभानो

5. चो॒द॒यि॒त्री

6. चित्रश्रवस्तमः

7. ईड्यः

8. अध्वरम्

9. स्वधावः

10. वन्वानाः

**सन्दर्भग्रन्थः**

1. ऋग्वेदभाष्यम्, सायणाचार्यकृतम्,वैदिकसंशोधनमण्डल्,पुना

**सहायकग्रन्थाः**

1. सूक्तसङ्ग्रः, पण्डितरामरामानुजाचार्यः, 2017
2. वैदिकसूक्तसंग्रहः, गीताप्रेस्, गोरखपुर्

**बोधप्रश्नोत्तराणि**

1. 10
2. सोमस्य
3. अश्विनी
4. अग्निमीळेइतिमन्त्रः
5. ७.

**अभ्यासप्रश्नाः**

1. सर्वेमन्त्राःकण्ठस्थीकरणीयाः
2. इन्द्रसूक्तस्थमन्त्रानांपदच्छेदंकृत्वाअन्वयःकरणीयः
3. अग्निसूक्तेप्रतिमन्त्रंविद्यमानाःधातवःदशसुलकारेषुलेखनीयाः

||श्रीः||

# कठोपनिषत्– खण्डः ५

**पाठरचना –**

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

श्रुतिः खलु वेदान्तस्य उत्तरमीमांसायाः वा आदिः। किन्तु उपनिषदुक्तविषयाणां बोधः सारल्येन न भवति। तज्जातानाम् अर्थानां ज्ञाने भ्रान्ताः स्यु र्लोका इति निश्चित्य तत्सारोन्मोचनाय शास्त्रस्य च रक्षणाय ग्रन्थान्तराणि विरचितानि। वेदान्तस्य विषयः खलु जीवब्रह्मणोः ऐक्यं यत्शुद्धचैतन्यम्। उपनिषदः वेदान्तत्वात्समान एव विषयः। उपनिषदः तदेव प्रतिपादयन्ति। कृष्णयजुर्वेदस्य कठशाखायां प्राप्यते इयं कठोपनिषत्, कठशाखायां पठितत्वात् अस्याः कठेति नाम। काठकोपनिषद् इत्यपि उच्यते सम्प्रदाये। इयं पद्यात्मिका। अत्र द्वौ अध्यायौ स्तः। प्रत्यध्यायं तिस्रः वल्ल्यः लसन्ति। कठोपनिषदि खलु आख्यायिकामुखेन ब्रह्मविद्या उपदिष्टा। आख्यायिकायाः विषय ब्रह्मविद्यास्तुतिः एव। **आख्यायिकाब्रह्मविद्यास्तुत्यर्था** इति शङ्करभगवत्पादाः तदीये कठोपनिषद्भाष्ये। यथा प्रथमतः एव नचिकेतोपाख्यानं विद्यते । तथाहि- कदाचित् वाजश्रवसः विश्वजिन्नामकं यागमाचरितवान्। अस्मिन्यागे सर्वमेव दक्षिणात्वेन दातव्यं भवति। तस्य पुत्रः आसीत्नचिकेताः। स च बालकः आसीत्। वाजश्रवसेन जीर्णगावः दक्षिणात्वेन दीयन्ते इति दृष्ट्वा नचिकेताःविचारयामास यत् अधमदक्षिणादानेन पितुःपापं स्यात्। तेन च तस्मिन्श्रद्धा आविवेश। अथ स श्रद्धावान्पितरमुवाच पितः! मां कस्मै दास्यसीति। बालकस्य वचनमिति मत्वा यदा वाजश्रवसः कर्णं न ददौ तदा वारं वारं नचिकेताः स्ववाक्यावर्तनं कृतवान्। ततः कुपितः सन् स उवाच मृत्यवे त्वां ददामीति। तदैव सहसा किमिदं मया उक्तमिति खिन्नमनाः संवृत्तः वाजश्रवसः। किन्तु नचिकेतास्तु श्रद्धावान् तत्र गत्वा यमात् वरत्रयं लब्ध्ववान् तत्र प्रथमं वरम् इष्टवान् – अहमत्र आगतः इति पिता निश्चयेन उत्कण्ठितः वर्तते । तस्मात् तस्य शान्तिःयथा स्यात्तथा, अपि च भवत् सकाशात् गमनात् परं प्रेतलोकादगच्छामि इत्यतः मां पूर्वमिव जानीयात् इति करोत्विति। यमः सन्तुष्टः सन् ईप्सितं वरं ददौ।

ततः स द्वितीयवरम् ऐच्छत्- स्वर्गेलोके हे मृत्यो त्वं नासि। पिपासादिदुःखमपि नास्ति । तस्मात्हेयमतं स्वर्गलोकप्राप्तिसाधनं अग्निं ब्रूहीति । तदा यमःअग्निविद्यां शिक्षापयामास नचिकेतसे। ततः तृतीयं वरं वृणुते यत्मनुष्ये प्रेते सति केचन वदन्ति अस्ति केचननास्तीति वदन्ति। अस्मिन्विषये या विद्या भवति तां मे ब्रूहीति। मृत्युरुवाच अयं विषयो देवैरपि पृष्टः इति। किन्तु अयं स्निग्धमनाः यमं न त्यक्तवान्। तस्य दृढतरमनोभावं दृष्ट्वा यमः तम् उपदिदेश।

एवमेव अस्याम्उपनिषदि ब्रह्मतत्त्वप्रतिष्ठापकमन्त्राः सन्तिबहवः। किञ्चित्तावत् उदाह्रियते परिचयाय – तत्र रथरूपककल्पनात्मको मन्त्रः बहुप्रसिद्धः। तथाहि जीवात्मा एव रथी रथस्वामी, शरीरं तु बुद्धिः सारथिः, मनः च, तत्र इन्द्रियाणि अश्वाः, तथा च गमनमार्गस्तु इन्द्रियविषयाः इति कल्पितम्। तेन शरीरेन्द्रियमनःसहित एव आत्मा मनीषिभिः संसारी इत्युच्यते। तेन केवलस्य आत्मनः भोक्तृत्वं निराकृतम्। कथं तर्हि प्राप्यते आत्मत्वप्राप्तिः इति चेत् रथी सत्पुरुषः चेत्सम्भवेत्, नोचेत्दुष्टेन रथिना आत्मावाप्तिः कपोलकल्पितेव इति।

## उद्देश्यम्

1. कठोपनिषदः विषयाः सरलया रीत्या ज्ञायन्ते
2. बालकस्य नचिकेतसः पितृभक्तिः ज्ञायते शक्नुमः
3. आत्मतत्त्वं सङ्क्षेपेण ज्ञातुं शक्यते
4. परमात्मस्वरूपं किमिति ज्ञायते
5. शिष्यस्य लक्षणं स्पष्टं ज्ञायते

## **मूलपाठः**

## प्रथमाध्याये प्रथमा वल्ली

ॐ उशन् ह वैवाजश्रवसः सर्ववेदसं ददौ।तस्य ह नचिकेता नाम पुत्र आस ॥ १॥

तँह कुमारँसन्तं दक्षिणासुनीयमानासुश्रद्धाविवेश सोऽमन्यत ॥ २॥

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।अनन्दा नाम तेलोकास्तान् स गच्छति ता ददत् ॥ ३॥

स होवाच पितरं तत कस्मैमां दास्यसीति ।द्वितीयं तृतीयं तँहोवाच मृत्यवेत्वा ददामीति ॥ ४॥बहूनामेमि प्रथमो बहूनामेमि मध्यमः ।किँ स्विद्यमस्य कर्तव्यं यन्मयाऽद्य करिष्यति ॥ ५॥

अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे।सस्यमिव मर्त्यः पच्यतेसस्यमिवाजायतेपुनः ॥ ६॥

वैश्वानरः प्रविशत्यतिथिर्ब्राहमणोगृहान् ।तस्यैताँशान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ ७॥आशाप्रतीक्षेसंगतँसूनृतांचेष्टापूर्ते पुत्रपशूँश्च सर्वान् ।

एतद्वृङ्क्ते पुरुषस्याल्पमेधसोयस्यानश्नन्वसति ब्राहमणोगृहे॥ ८॥

तिस्रोरात्रीर्यदवात्सीर्गृहेमेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः ।

नमस्तेऽस्तुब्रह्मन् स्वस्ति मेऽस्तुतस्मात्प्रति त्रीन्वरान्वृणीष्व ॥ ९॥

शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमोमाऽभि मृत्यो।

त्वत्प्रसृष्टं माऽभिवदेत्प्रतीतएतत् त्रयाणां प्रथमं वरं वृणे॥ १०॥

यथा पुरस्ताद् भविता प्रतीतऔद्दालकिरारुणिर्मत्प्रसृष्टः ।

सुखँरात्रीः शयिता वीतमन्युःत्वां ददृशिवान्मृत्युमुखात् प्रमुक्तम् ॥ ११॥

स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति ।

उभेतीर्त्वाऽशनायापिपासेशोकातिगोमोदतेस्वर्गलोके ॥ १२॥

स त्वमग्निँ स्वर्ग्यमध्येषि मृत्योप्रब्रूहि त्वँश्रद्दधानाय मह्यम् ।

स्वर्गलोका अमृतत्वं भजन्तएतद् द्वितीयेन वृणेवरेण ॥ १३॥

प्र तेब्रवीमि तदुमेनिबोधस्वर्ग्यमग्निं नचिकेतः प्रजानन् ।

अनन्तलोकाप्तिमथोप्रतिष्ठांविद्धि त्वमेतं निहितं गुहायाम् ॥ १४॥

लोकादिमग्निं तमुवाच तस्मैया इष्टका यावतीर्वा यथा वा ।

स चापि तत्प्रत्यवदद्यथोक्तंअथास्य मृत्युः पुनरेवाह तुष्टः॥ १५॥

तमब्रवीत् प्रीयमाणोमहात्मावरं तवेहाद्य ददामि भूयः ।

तवैव नाम्ना भविताऽयमग्निःसृङ्कां चेमामनेकरूपां गृहाण॥ १६॥

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिंत्रिकर्मकृत्तरति जन्ममृत्यू।

ब्रह्मजज्ञं देवमीड्यं विदित्वानिचाय्येमाँशान्तिमत्यन्तमेति॥ १७॥

त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाँश्चिनुतेनाचिकेतम् ।

स मृत्युपाशान् पुरतः प्रणोद्यशोकातिगोमोदतेस्वर्गलोके॥ १८॥

एष तेऽग्निर्नचिकेतः स्वर्ग्योयमवृणीथा द्वितीयेन वरेण ।

एतमग्निं तवैव प्रवक्ष्यन्ति जनासःतृतीयं वरं नचिकेतोवृणीष्व॥ १९॥

येयं प्रेतेविचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके ।

एतद्विद्यामनुशिष्टस्त्वयाऽहंवराणामेष वरस्तृतीयः॥ २०॥

देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः ।

अन्यं वरं नचिकेतोवृणीष्वमा मोपरोत्सीरति मा सृजैनम्॥ २१॥

देवैरत्रापि विचिकित्सितं किलत्वंच मृत्योयन्न सुज्ञेयमात्थ ।

वक्ता चास्य त्वादृगन्योन लभ्योनान्योवरस्तुल्य एतस्य कश्चित् ॥ २२॥

शतायुषः पुत्रपौत्रान्वृणीष्वाबहून्पशून् हस्तिहिरण्यमश्वान् ।

भूमेर्महदायतनं वृणीष्वस्वयं च जीव शरदोयावदिच्छसि ॥ २३॥

एतत्तुल्यं यदि मन्यसेवरंवृणीष्व वित्तं चिरजीविकां च ।

महाभूमौनचिकेतस्त्वमेधिकामानां त्वा कामभाजं करोमि ॥ २४॥

येयेकामा दुर्लभा मर्त्यलोकेसर्वान् कामाँश्छन्दतः प्रार्थयस्व ।

इमा रामाः सरथाः सतूर्यान हीदृशा लम्भनीया मनुष्यैः ।

आभिर्मत्प्रत्ताभिः परिचारयस्वनचिकेतोमरणं माऽनुप्राक्षीः ॥ २५॥

श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेंद्रियाणां जरयन्ति तेजः ।

अपि सर्वं जीवितमल्पमेवतवैव वाहास्तव नृत्यगीते॥ २६॥

न वित्तेन तर्पणीयोमनुष्योलप्स्यामहेवित्तमद्राक्ष्म चेत्त्वा ।

जीविष्यामोयावदीशिष्यसि त्वंवरस्तुमेवरणीयः स एव ॥ २७॥

अजीर्यताममृतानामुपेत्यजीर्यन्मर्त्यः क्वधःस्थः प्रजानन् ।

अभिध्यायन् वर्णरतिप्रमोदान्अतिदीर्घे जीवितेकोरमेत ॥ २८॥

यस्मिन्निदं विचिकित्सन्ति मृत्योयत्साम्परायेमहति ब्रूहि नस्तत् ।

योऽयं वरोगूढमनुप्रविष्टोनान्यं तस्मान्नचिकेता वृणीते॥ २९॥

**॥ इति काठकोपनिषदि प्रथमाध्याये प्रथमा वल्ली॥**

## प्रथमाध्याये प्रथमवल्लीसारः

वाजश्रवाः यज्ञफलकामनया सर्वं दानं कृतवान्। वाजश्रवसश्चनचिकेता नाम पुत्रः आसीत् ।यदा दक्षिणा गृह्णाति स्म तदा कुमार एव नचिकेता आदरविचारेन पूरितः अभवत् । दोग्धुमसमर्थाः निरर्थकाः च गावः यः दानं करोति सः आनन्दविहीनान् लोकान् गच्छति।स पितरमुवाच हे पिता !मां कस्मै दास्यसि ? पुनः पुनः द्वितीयवारं तृतीयवारं च पृष्ठेस पिता एवम् उक्तवान् त्वां मृत्युं ददामि इति ।सर्वेषां मध्ये अग्रगामी भवामि सर्वेषां मध्ये मध्यगामी भवामि न तु पश्चाद्गामी इति स अचिन्तयत्। स यमलोकं गतवान्। यथा अग्निः प्रविशति तथा ब्राह्मणपुत्रः नचिकेताः अपि यमपुरीं प्रविशति । अतः तस्य सत्कारे कृते सति पशुपुत्रादिरूपान् फलान् भुङ्क्ते पुरुषः इति ज्ञात्वा यमोऽपि तं पृष्टवान् किमपेक्षतमिति ।रात्रित्रयं यमपुर्यां उषितः त्वमिति कृत्वावरत्रयं पृच्छ्यताम् । ततः प्रथमवरेण मम पितुः क्रोधाभावः,एवं मम पुनर्गमनसमये इतःपूर्वं मदुपरि यादृशी प्रीतिः आसीत् तादृशी प्रीतिः अपेक्षिता इति प्रार्थितवान्।यमः उवाच ममानुमत्या भवत्पितुः भवन्तं विजानाति एवं पूर्ववदेव प्रीत्या विश्वसिति ।तस्य कोपोऽपि अग्नौ दग्ध इव नष्टो भवति। सः द्वितीयवरेण अग्निविद्यां अयाचत् ।ततः यमः तं समाग्रां अग्निविद्यां एवं स्वर्गस्य साधनानि च उपदिष्टवान् ।अनन्तरं नचिकेताः तस्य अनूच्चारणं कृतवान् । यत् यमेन उक्तम् ।ततःपरं नचिकेताः अपृच्छत् “केचन वदन्ति मरणानन्तरं आत्मा तिष्ठतीति, अन्ये तु आत्मा न तिष्ठतीति अतः मम सन्देहो जातः,मां आत्मविद्यां उपदिशतु”इति ।यमः वदति “भोः पूर्वकाले भगवतोऽपि एतादृशसन्देहः अस्त्येव अतः मां एतादृशप्रश्नान् मा पृच्छतु अन्यत्किमपि पृच्छतु” इति ।नचिकेताः वदति “भवतु ब्रह्मणोऽपि सन्देहः अथापि भवन्तं विना एतद्विषये कोपि उपदेष्टा नास्ति, एवं

एतदपेक्षया अन्यद्वरं न याचे" इति । तस्य मनोदार्ढ्य शोधनाय यमः बहुधा पशुपुत्रान् ददामि इति रीत्या प्रतारितवान् । अथापि नचिकेताः अत्यन्तदृढसङ्कल्पः आत्मविद्यामेव पुनःपुनः अयाचत् ।

## द्वितीयवल्ली

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थअ पुरुषं सिनीतः ।

तयोः श्रेयः आदधानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ।।१ ।।

श्रेयश्च प्रेयश्च मनुष्यमेतःतौसम्परीत्य विविनक्ति धीरः ।

श्रेयोहि धीरोऽभि प्रेयसोवृणीतेप्रेयोमन्दोयोगक्षेमाद्वृणीते॥ २॥

स त्वं प्रियान्प्रियरूपांश्च कामान्अभिध्यायन्नचिकेतोऽत्यस्राक्षीः ।

नैतां सृङ्कां वित्तमयीमवाप्तोयस्यां मज्जन्ति बहवोमनुष्याः॥ ३॥

दूरमेते विपरीतेविषूचीअविद्या याच विद्येति ज्ञाता ।

विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त॥ ४॥

अविद्यायामन्तरेवर्तमानाःस्वयं धीराः पण्डितंमन्यमानाः ।

दन्द्रम्यमाणाः परियन्ति मूढाअन्धेनैव नीयमाना यथान्धाः॥ ५॥

न साम्परायः प्रतिभाति बालंप्रमाद्यन्तं वित्तमोहेन मूढम् ।

अयं लोकोनास्ति पर इति मानीपुनः पुनर्वशमापद्यतेमे॥ ६॥

श्रवणायापि बहुभिर्यो न लभ्यःशृण्वन्तोऽपि बहवोयं न विद्युः ।

आश्चर्यो वक्ता कुशलोऽस्य लब्धाआश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७॥

न नरेणावरेण प्रोक्त एषसुविज्ञेयोबहुधा चिन्त्यमानः ।

अनन्यप्रोक्ते गतिरत्र नास्तिअणीयान् ह्यतर्क्यमणुप्रमाणात् ॥ ८॥

नैषा तर्केण मतिरपनेयाप्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।

यां त्वमापः सत्यधृतिर्बतासित्वादृङ्नोभूयान्नचिकेतः प्रष्टा ॥ ९॥

जानाम्यहं शेवधिरित्यनित्यंन ह्यध्रुवैः प्राप्यतेहि ध्रुवं तत् ।

ततोमया नाचिकेतश्चितोऽग्निःअनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १०॥

कामस्याप्तिं जगतः प्रतिष्ठांक्रतोरानन्त्यमभयस्य पारम् ।

स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वाधृत्या धीरोनचिकेतोऽत्यस्राक्षीः ॥ ११॥

तं दुर्दर्शं गूढमनुप्रविष्टंगुहाहितं गह्वरेष्ठं पुराणम् ।

अध्यात्मयोगाधिगमेन देवंमत्वा धीरोहर्षशोकौजहाति ॥ १२॥

एतच्छ्रुत्वा सम्परिगृह्य मर्त्यःप्रवृह्य धर्म्यमणुमेतमाप्य ।

स मोदतेमोदनीयँहि लब्ध्वाविवृतँसद्म नचिकेतसं मन्ये॥ १३॥

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।

अन्यत्र भूताच्च भव्याच्चयत्तत्पश्यसि तद्वद॥ १४॥

सर्वे वेदा यत्पदमामनन्तितपांसि सर्वाणिच यद्वदन्ति ।

यदिच्छन्तोब्रह्मचर्यं चरन्तितत्तेपदं सङ्ग्रहेण ब्रवीम्योमित्येतत्॥ १५॥

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् ।

एतद्ध्येवाक्षरं ज्ञात्वा योयदिच्छति तस्य तत्॥ १६॥

एतदालम्बनँश्रेष्ठमेतदालम्बनं परम् ।

एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ १७॥

न जायतेम्रियतेवा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।

अजोनित्यः शाश्वतोऽयं पुराणो न हन्यतेहन्यमानेशरीरे॥ १८॥

हन्ता चेन्मन्यतेहन्तुँहतश्चेन्मन्यतेहतम् ।

उभौतौन विजानीतोनायँहन्तिन हन्यते॥ १९॥

अणोरणीयान्महतोमहीयानात्माऽस्य जन्तोर्निहितोगुहायाम् ।

तमक्रतुः पश्यति वीतशोकोधातुप्रसादान्महिमानमात्मनः॥ २०॥

आसीनोदूरं व्रजति शयानोयाति सर्वतः ।

कस्तं मदामदं देवं मदन्योज्ञातुमर्हति॥ २१॥

अशरीरँशरीरेष्वनवस्थेष्ववस्थितम् ।

महान्तं विभुमात्मानं मत्वा धीरोन शोचति॥ २२॥

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।

यमेवैष वृणुतेतेन लभ्यःतस्यैष आत्मा विवृणुतेतनूँ स्वाम् ॥ २३॥

नाविरतोदुश्चरितान्नाशान्तोनासमाहितः ।

नाशान्तमानसोवाऽपि प्रज्ञानेनैनमाप्नुयात् ॥ २४॥

यस्य ब्रह्म च क्षत्रं च उभेभवत ओदनः ।

मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥ २५॥

**इति काठकोपनिषदि प्रथमाध्याये द्वितीया वल्ली ॥**

## प्रथमाध्याये द्वितीयवल्लीसारः

यमः तस्य दृढत्वं दृष्ट्वा आत्मोपदेशं कर्तुं आरब्धवान् ।तत्र आदौ मुमुक्षोः महिमा प्रतिपादितं तथा हि मनुष्यस्य मार्गद्वयं भवति ।एकः श्रेयो मार्गः द्वितीयः प्रेयो मार्गः । तत्र श्रेयोमार्गं यः स्वीकरोति तस्य उत्तमगतिः भवति । यः प्रेयोमार्गं स्वीकरोति सः पतति । विद्वांस्तावत् यः श्रेयोमार्गं स्वीकरोति स एव ।प्रेयोमार्गस्वीकर्ता तु लौकिकाकामनाविष्टः मूढो भवति ।अतः हे नचिकेत! भवान् प्रेयोमार्गं त्यक्त्वा श्रेयोमार्गं प्रति आगच्छतीति भाति ।विद्याविद्येति द्वे विभागे स्तः तदुभयं ज्ञात्वा अपि विद्वान् विद्यामेव स्वीकरिष्यति न तु अविद्याम् ।अविद्याग्रस्तो हि स्वयमेव विद्वानिति मनुते मूढरूपेण अनन्तरं कष्टं अनुभवति ।एवं आत्मज्ञानं तावत् अत्यन्तं दुर्लभं भवति ।वक्तापि दुर्लभः श्रोतापि दुर्लभः इति आत्मप्राशस्त्यं यमेन उपदिष्टम् । इदं सर्वं श्रुत्वा नचिकेताः यमं पृष्टवान् “प्राप्यं वस्तु किं यत् वेदे प्रतिपादितं सकलवेदान्ते च प्रतिपादितं यत् ओङ्काररूपं इति वस्तु तद्वद?”इति ।एतच्छ्रुत्वा यमः उत्तरं वदति “ओमिति ब्रह्मणो वाचकं यः सर्व फलप्रदः भवति । ओं कारेण मनुष्यः परब्रह्म जानाति। तदनुभवतिच । ततः परं आत्मोपदेशः आरब्धः, अयं आत्मा न जायते न नश्यति । तस्य आदिः अन्तोऽपि नास्ति तस्य उत्पादयितापि नास्ति नाशकोपि नास्ति ।यदि नाशकः चिन्तयति आत्मा नाशयितुं शक्नोतीति । यदि मनुष्यः स्वयं आत्मा नष्टः इति चिन्तयति ।सः मूढो भविष्यति ततः नष्टो भवति ।अयं आत्मा अणोः अणीयान् भवति महतः महीयान् भवति ।जीवस्य हृदयगुहायां वसति । ईदृशं आत्मानं यः जानाति स एव विद्वान्भवति तस्य मुक्तिर्भवति ।

# तृतीयवल्ली

ऋतं पिबन्तौसुकृतस्य लोकेगुहां प्रविष्टौपरमेपरार्धे ।

छायातपौब्रह्मविदोवदन्तिपञ्चाग्नयोयेच त्रिणाचिकेताः ॥ १॥

यः सेतुरीजानानामक्षरं ब्रह्म यत् परम् ।

अभयं तितीर्षतां पारं नाचिकेतँशकेमहि ॥ २॥

आत्मानँरथितं विद्धि शरीरँरथमेव तु।

बुद्धिं तुसारथिं विद्धि मनः प्रग्रहमेव च ॥ ३॥

इन्द्रियाणि हयानाहुर्विषयाँस्तेषुगोचरान् ।

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ ४॥

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।

तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ ५॥

यस्तुविज्ञानवान्भवति युक्तेन मनसा सदा ।

तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ ६॥

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः ।

न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥ ७॥

यस्तुविज्ञानवान्भवति समनस्कः सदा शुचिः ।

स तुतत्पदमाप्नोति यस्माद्भूयो न जायते॥ ८॥

विज्ञानसारथिर्यस्तुमनः प्रग्रहवान्नरः ।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ ९॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।

मनसस्तुपरा बुद्धिर्बुद्धेरात्मा महान्परः ॥ १०॥

महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।

पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥ ११॥

एष सर्वेषुभूतेषुगूढोऽऽत्मा न प्रकाशते।

दृश्यतेत्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२॥

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।

ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥ १३॥

उत्तिष्ठत जाग्रतप्राप्य वरान्निबोधत ।

क्षुरस्य धारा निशिता दुरत्ययादुर्गं पथस्तत्कवयोवदन्ति ॥ १४॥

अशब्दमस्पर्शमरूपमव्ययंतथाऽरसं नित्यमगन्धवच्च यत् ।

अनाद्यनन्तं महतः परं ध्रुवंनिचाय्य तन्मृत्युमुखात् प्रमुच्यते॥ १५॥

नाचिकेतमुपाख्यानं मृत्युप्रोक्तँ सनातनम् ।

उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते॥ १६॥

य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि प्रयतः श्राद्धकालेवा तदानन्त्याय कल्पते।

तदानन्त्याय कल्पत इति ॥ १७॥

**इति काठकोपनिषदि प्रथमाध्याये तृतीया वल्ली ॥**

## प्रथमाध्याये तृतीयवल्लीसारः

अस्यां वल्ल्यां मोक्षप्राप्तिसाधनं उपदिशति यमः तत्र आदौ जीवात्मपरमात्मनोः स्वरूपं उपदिशति ।तत्र जीवः कर्मफलं भुङ्क्तते ईश्वरः अभुङ्क्ते । पञ्चाग्नयः ये गृहस्थाः अग्निविद्या द्वारा परब्रह्म प्राप्नुवन्ति ।"हे नचिकेत! भगवन्तं रथित्वेन शरीरञ्च रथत्वेनपश्यइति ।बुद्धिमन्तः वदन्ति इन्द्रियाणि च तस्य रथस्य अश्वाः भवन्ति । तस्य साधनानि भवन्ति मार्गाः भोक्ता च आत्मैव इति" यः अविज्ञानवान् भवति सः दुष्टाश्वैः इव कुमार्गं नयति ।यस्तु विद्वान् भवति तस्य तु मार्गः श्रयो भवति तथा समनस्कः शुचिश्च भवति तेन तत्पदं आप्नोति ।अनन्तरं इन्द्रियादिभ्यः आत्मनः विवेकः प्रदर्शितः यथा हि इनद्रियाणि अर्थेभ्यो श्रष्ठाणि भवन्ति ।ततः मनः ततः आत्मा श्रेष्ठः तदुपरि कश्चिन्नास्ति ।उत्तिष्ठ ! जाग्रत! प्राप्य वरान्निबोधत ! इति उपदेशं कृतवान् ।

## द्वितीयाध्याये प्रथमा वल्ली

पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात्पराङ्पश्यति नान्तरात्मन् ।

कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥ १॥

पराचः कामाननुयन्ति बालास्तेमृत्योर्यन्ति विततस्य पाशम् ।

अथ धीरा अमृतत्वं विदित्वाध्रुवमध्रुवेष्विह न प्रार्थयन्ते॥ २॥

येन रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् ।

एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वैतत् ॥ ३॥

स्वप्नान्तं जागरितान्तं चोभौयेनानुपश्यति ।

महान्तं विभुमात्मानं मत्वा धीरोन शोचति ॥ ४॥

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ।

ईशानं भूतभव्यस्य न ततोविजुगुप्सते। एतद्वैतत् ॥ ५॥

यः पूर्वं तपसोजातमद्भ्यः पूर्वमजायत ।

गुहां प्रविश्य तिष्ठन्तं योभूतेभिर्व्यपश्यत । एतद्वैतत् ॥ ६॥

या प्राणेन संभवत्यदितिर्देवतामयी ।

गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत । एतद्वैतत् ॥ ७॥

अरण्योर्निहितोजातवेदा गर्भ इव सुभृतोगर्भिणीभिः ।

दिवेदिवेईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः । एतद्वैतत् ॥ ८॥

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति ।

तं देवाः सर्वेऽर्पितास्तदुनात्येति कश्चन । एतद्वैतत् ॥ ९॥

यदेवेह तदमुत्र यदमुत्र तदन्विह ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १०॥

मनसैवेदमाप्तव्यं नेह नानाऽस्ति किंचन ।

मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति ॥ ११॥

अङ्गुष्ठमात्रः पुरुषोमध्य आत्मनि तिष्ठति ।

ईशानं भूतभव्यस्य न ततोविजुगुप्सते। एतद्वैतत् ॥ १२॥

अङ्गुष्ठमात्रः पुरुषोज्योतिरिवाधूमकः ।

ईशानोभूतभव्यस्य स एवाद्य स उ श्वः । एतद्वैतत् ॥ १३॥

यथोदकं दुर्गे वृष्टं पर्वतेषुविधावति ।

एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ॥ १४॥

यथोदकं शुद्धेशुद्धमासिक्तं तादृगेव भवति ।

एवं मुनेर्विजानत आत्मा भवति गौतम ॥ १५॥

**इति काठकोपनिषदि द्वितीयाध्यायेप्रथमा वल्ली ॥**

## द्वितीयाध्याये प्रथमवल्लीसारः

प्रथमाध्याये आत्मपरमात्मनोः स्वरूपं तत्प्राप्त्युपायश्च निरूपितम् ।इदानीं अस्मिन्नध्याये ब्रह्मप्राप्तिबाधकानि विघ्नकराणि सर्वाणीन्द्रियाणि प्रदर्श्य आत्मप्राप्तौ विघ्नानि एव ज्ञातव्यानि ।ज्ञात्व एव तत्परित्यागेन ब्रह्मप्राप्तिसाधनानि प्राप्तुं शक्यानि इति प्रतिपाद्यते । तत्र आदौ परमेश्वरात् इन्द्रियाणि सृष्टाणिइति प्रतिपाद्य तानि च इन्द्रियानि बहिर्गन्तुं योग्यानि नान्तः इति च प्रतिपाद्य अविद्वांसः लोकाः कामवशात् इन्द्रियमार्गेणैवगच्छन्तः नष्टो भवन्ति । विद्वांसस्तावत् अतिविरलाः सर्वाणीन्द्रियाणि निरुध्य अन्तर्विद्यामानं आत्मानं पश्यति । यः मनुष्यः जाग्रदवस्थायां स्वापावस्थायां च आत्मनः द्वारा ज्ञानी भवति ।सः बुद्धिमान् सर्वदा शोकं न प्राप्नोति ।अङ्गुष्ठपरिमितः पुरुषः शरीरे तिष्ठति यः स एव भूतं भविष्यच्च नियमयति। एतत् ज्ञात्वा विद्वान् न शोचति।

# द्वितीयाध्याये द्वितीयवल्ली

पुरमेकादशद्वारमजस्यावक्रचेतसः ।

अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते। एतद्वैतत् ॥ १॥

हँसः शुचिषद्वसुरन्तरिक्षसद्होता वेदिषदतिथिर्दुरोणसत् ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २॥

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति ।

मध्येवामनमासीनं विश्वेदेवा उपासते॥ ३॥

अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः ।

देहाद्विमुच्यमानस्य किमत्र परिशिष्यते। एतद्वैतत् ॥ ४॥

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।

इतरेण तुजीवन्ति यस्मिन्नेतावुपाश्रितौ॥ ५॥

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।

यथा च मरणं प्राप्य आत्मा भवति गौतम ॥ ६॥

योनिमन्येप्रपद्यन्तेशरीरत्वाय देहिनः ।

स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥ ७॥

य एष सुप्तेषुजागर्ति कामं कामं पुरुषोनिर्मिमाणः ।

तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।

तस्मिँल्लोकाः श्रिताः सर्वे तदुनात्येति कश्चन । एतद्वैतत् ॥ ८॥

अग्निर्यथैकोभुवनं प्रविष्टोरूपं रूपं प्रतिरूपोबभूव ।

एकस्तथा सर्वभूतान्तरात्मारूपं रूपं प्रतिरूपोबहिश्च ॥ ९॥

वायुर्यथैकोभुवनं प्रविष्टोरूपं रूपं प्रतिरूपोबभूव ।

एकस्तथा सर्वभूतान्तरात्मारूपं रूपं प्रतिरूपोबहिश्च ॥ १०॥

सूर्यो यथा सर्वलोकस्य चक्षुःन लिप्यतेचाक्षुषैर्बाह्यदोषैः ।

एकस्तथा सर्वभूतान्तरात्मान लिप्यतेलोकदुःखेन बाह्यः ॥ ११॥

एकोवशी सर्वभूतान्तरात्माएकं रूपं बहुधा यः करोति ।

तमात्मस्थं येऽनुपश्यन्ति धीराःतेषां सुखं शाश्वतं नेतरेषाम् ॥ १२॥

नित्योऽनित्यानां चेतनश्चेतनानाम्एकोबहूनां योविदधाति कामान् ।

तमात्मस्थं येऽनुपश्यन्ति धीराःतेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३॥

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् ।

कथं नुतद्विजानीयां किमुभाति विभाति वा ॥ १४॥

न तत्र सूर्यो भाति न चन्द्रतारकंनेमा विद्युतोभान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वंतस्य भासा सर्वमिदं विभाति ॥ १५॥

**इति काठकोपनिषदि द्वितीयाध्याये द्वितीया वल्ली ॥**

# द्वितीयाध्याये द्वितीयवल्लीसारः

अयमात्मा अजन्यः अपरिच्छेद्यो विद्यते। एकादशद्वारैः पुरं ध्यानमनुषठाय बन्धात् मुञ्चति। अस्य आत्मनः स्थितिः पवित्रतमा भवति। मुक्त्यनन्तरम् अयमात्मा अन्तरिक्षे तिष्ठति। ज्ञानिभिस्सह तिष्ठति। यज्ञे सोमरूपेण सः वसति। सः जलेऽपि उत्पद्यते। पर्वतेऽपि उत्पद्यते। सः आत्मा उत्तमः इति प्रशंसति। आत्मा हि प्राणमुन्नयति अपानमधो नयति। प्राणापानौ न जीवकारणं भवतः किन्तु आत्मैव।प्राणापानावपि आत्मानमेव आश्रयेते इति उपदेशं कृत्वा यमः नचिकेतसमाह – हे नचिकेत! अहं परमात्मनः गूढस्वरूपमुपदिशामि इत्युक्त्वा परमात्मनः स्वरूपमुपादिशत्। तथाहि- परमात्मा नाम यः पुरुषः न स्वपिति सर्वदा सर्वं पश्यति स एव।स परमात्मा सर्वव्यापकः यथा अग्निः एक एव भुवनान्तर्गतः त्रिवृत्करणेन प्रवृष्टस्सन् सर्वत्र सङ्क्रान्तो भवति तद्वत् अयमपि । अयमेव सर्वनियन्ता स्वशक्त्या सर्वान्नियमयति। एतादृशं परमात्मानं साक्षात्कृत्य सुखमनुभवति ।

## द्वितीयाध्याये तृतीया वल्ली

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः ।

तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।

तस्मिँल्लोकाः श्रिताः सर्वे तदुनात्येति कश्चन । एतद्वैतत् ॥ १॥

यदिदं किं च जगत् सर्वं प्राण एजति निःसृतम् ।

महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्तेभवन्ति ॥ २॥

भयादस्याग्निस्तपति भयात्तपति सूर्यः ।

भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥ ३॥

इह चेदशकद्बोद्धुं प्राक्षरीरस्य विस्रसः ।

ततः सर्गेषुलोकेषुशरीरत्वाय कल्पते॥ ४॥

यथाऽऽदर्शे तथाऽऽत्मनि यथा स्वप्नेतथा पितृलोके ।

यथाऽप्सुपरीव ददृशेतथा गन्धर्वलोके

छायातपयोरिव ब्रह्मलोके ॥ ५॥

इन्द्रियाणां पृथग्भावमुदयास्तमयौच यत् ।

पृथगुत्पद्यमानानां मत्वा धीरोन शोचति ॥ ६॥

इन्द्रियेभ्यः परं मनोमनसः सत्त्वमुत्तमम् ।

सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ॥ ७॥

अव्यक्तात्तुपरः पुरुषोव्यापकोऽलिङ्ग एव च ।

यं ज्ञात्वा मुच्यतेजन्तुरमृतत्वं च गच्छति ॥ ८॥

न संदृशेतिष्ठति रूपमस्य

न चक्षुषा पश्यति कश्चनैनम् ।

हृदा मनीषा मनसाऽभिक्लृप्तो

य एतद्विदुरमृतास्तेभवन्ति ॥ ९॥

यदा पञ्चावतिष्ठन्तेज्ञानानि मनसा सह ।

बुद्धिश्च न विचेष्टतेतामाहुः परमां गतिम् ॥ १०॥

तां योगमिति मन्यन्तेस्थिरामिन्द्रियधारणाम् ।

अप्रमत्तस्तदा भवति योगोहि प्रभवाप्ययौ॥ ११॥

नैव वाचा न मनसा प्राप्तुं शक्योन चक्षुषा ।

अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते॥ १२॥

अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।

अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥ १३॥

यदा सर्वे प्रमुच्यन्तेकामा येऽस्य हृदि श्रिताः ।

अथ मर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते॥ १४॥

यदा सर्वे प्रभिद्यन्तेहृदयस्येह ग्रन्थयः ।

अथ मर्त्योऽमृतोभवत्येतावद्ध्यनुशासनम् ॥ १५॥

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।

तयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ङन्या उत्क्रमणेभवन्ति ॥ १६॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मासदा जनानां हृदयेसंनिविष्टः ।

तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण ।

तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥ १७॥

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वाविद्यामेतां योगविधिं च कृत्स्नम् ।

ब्रह्मप्राप्तोविरजोऽभूद्विमृत्युरन्योऽप्येवं योविदध्यात्ममेव ॥ १८॥

सह नाववतु। सह नौभुनक्तु । सह वीर्यं करवावहै।

तेजस्विनावधीतमस्तुमा विद्विषावहै॥ १९॥

ॐ शान्तिः शान्तिः शान्तिः ॥

**इति काठकोपनिषदि द्वितीयाध्यायेतृतीया वल्ली ॥**

ॐ सह नाववतु। सह नौभुनक्तु । सहवीर्यं करवावहै।

तेजस्वि नावधीतमस्तु। मा विद्विषावहै॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ तत् सत् ॥

**द्वितीयाध्याये तृतीयवल्लीसारः**

अस्यां वल्ल्यां परमात्मनः स्वरूपं विशेषेण प्रतिपादयति यमः नचिकेतसे।तत्र आदौ अश्वत्थवृक्षरूपेण ब्रह्मणः रूपणं क्रियते। तथाहि – अयं परमात्मा ऊरध्वमूलः अधश्शाखः भवति। तद् ब्रह्म अमृतं तदेव शुक्रं तदमृतमित्युच्यते।इदं सर्वं जगत् ब्रह्मणः एव उत्पद्यते स एव जगतः प्राणभूतो भवति।अस्य अग्निः तपति,सूर्यः तपति, तथा इन्द्रः, वायुः, मृत्युश्च धावति। यदि कश्चित् मरणात् पूर्वं ब्रह्मज्ञानी भवति तस्य पुनः जन्म न विद्यते अन्यथा तु पुनः पुनः संसार एव।दर्पणे यथा मुखाकृतिः भवति तद्वदेव बुद्धौ आत्मा दृष्टिगोचरो भवति। विद्वान् पृथगुत्पद्यमानान् इन्द्रियान् दृष्ट्वा न शोचति। कुतः इति चेत्- इन्द्रियेभ्यो परं मनः, मनसः सत्त्वमुत्तमं,ततः महत्, महतः अव्यक्तमुत्तमं, तस्मात् परः पुरुषः तं ज्ञात्वा विद्वान् अमृतत्वमेति ।एवं रीत्या परमात्मनः प्रकृतेः जीवात्मनः इन्द्रियाणाञ्च स्वरूपं यथाक्रमं यमः नचिकेतसं उपदिष्टवान् ।इदमेव उपनिषदः सारं इत्यपि उक्तम् । इदं सर्वं श्रुत्वा नचिकेताः प्राप्तब्रह्मविद्यःदोषरहितस्सन्

ब्रह्ममयोऽभूत् ।एवमेव अन्येऽपि आत्मज्ञानं संप्राप्य नचिकेतसमिव ब्रह्मलोकसायुज्यं प्राप्नुवन्तु इति कठोपनिषत् प्रतिपादयति इति शम् ।।

**बोधप्रश्नाः**

१ वाजश्रवाः कस्य पुत्रः?

२ वाजश्रवाः किं यज्ञं अनुष्ठितवान् ?

३ यमः नचिकेतसे कति वराणि दत्तवान् ?

४ जीवात्मनः उत्पत्तिः नास्तीति प्रतिपादको मन्त्रः कः?

५ कं दृष्ट्वा सूर्यः तपति ?

**शब्दावली**

नचिकेताः, जग्धतृणाः, अनन्दाः, शतायुषः, शेवधिः, शाश्वतः, अशब्दम्,ऊर्ध्वमूलः, विष्वक् ।

**सन्दर्भग्रन्थः**

**एकादशोपनिषदः - THE DIVINE LIFE SOCIETY, UTTARAKHAND - 2012**

**सहायकग्रन्थाः**

१ कठोपनिषत् शाङ्करभाष्यसहितम् –गीताप्रेस् गोरखपुर- २०१५

२ कठोपनिषत् रामरङ्गशर्मा सहितम्, भारतीयविद्या प्रकाशनम् , वाराणसी - १९७९

**बोधप्रश्नोत्तराणि**

१ अरुणि महर्षेः पुत्रः ।

२ विश्वजित् यागः

३ त्रीणि

४ न जायते म्रियते वा विपश्चित् इति मन्त्रः ।

५ परमात्मानं दृष्ट्वा तपति ।

**अभ्यासप्रश्नाः**

१. प्रथमाध्यास्य प्रथमवल्ल्याः मन्त्रान् कण्ठस्थी कुरुत ।
२. कठोपनिषदि विद्यमानानां धातूनां दशसु लकारेषु रूपाणि विलिख्य स्वभाषया वाक्यरचनां कुरुत ।
३. जीवपरमात्मनोः कस्सम्बन्धः द्वितीयाध्यायमनुसृत्य लिखत।

***************